नित्रवक्ष्यमपहाहिमालाशब्दः पुष्पस्रजमेवाभिधत्ते ॥ स्थिते चैतत्समर्थनं त्वलं कर्णावतंसादि वञ्जघनका
वैत्यादि प्रयुज्यते ॥ जगाद मधुरं वाचं विशदाक्षरशालिनीमित्यादौ क्रियाविशेषणत्वेऽपि नाविवक्षितार्थप्रती

का.प्र. ५० तिसिद्धेगतार्थस्यापि विशेष्यस्य विशेषणं हानार्थं प्रयोगः कार्य इति नयुक्तमुक्तं ॥ पुनरुक्तत्वे वा चरणत्रपरित्राणरहिता
५० भ्यामतिद्रुतं ॥ पादाभ्यां दूरमध्वानं व्रजन्नेपि न खिद्यत इत्यत्र द्वाहार्यो ॥ ख्यातेर्थे निर्हेतोरदुष्टता ॥ यथा चंद्रंगताप
50 द्मगुणान्नभुंक्ते पद्माश्रिता चांद्रमसीमभिख्यां ॥ उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥
अत्र रात्रौ पद्मस्य संकोचो दिवा चंद्रमसश्च निःप्रभत्वं लोकप्रसिद्धमिति न भुंक्ते इति हेतुं नापेक्षते ॥ अनुकर
णे तु सर्वेषां श्रुतिकटुप्रभृतीनां दोषाणां ॥ यथा मृगचक्षुषमद्राक्षमित्यादि कथयत्ययं । पश्येष च गावित्याह । सु
त्रामाणं यजेति चा वक्त्राद्यौचित्यवशाद्दोषोपि गुणः क्वचित्क्वचिन्नोभौ वक्तृप्रतिपाद्यव्यंग्यवाच्यप्रकरणादीनां
महिम्ना दोषोपि क्वचिद्गुणः ॥ क्वचिन्न दोषो न गुणः ॥ तत्र वैय्याकरणादौ वक्तरि प्रतिपाद्ये वा रौद्रादौ च
रसे व्यंग्ये कष्टत्वं गुणः ॥ क्रमेणोदाहरणानि ॥ दीधीङ्वेवीङ्समः कश्चिद्गुणवृद्ध्योरभाजनं ॥ क्विप्प्रत्य
यनिभः कश्चिद्यत्र सन्निहिते न ते ॥ यदा त्वामहमद्राक्षं पदविद्याविशारदं ॥ उपाध्यायं तदास्मार्षं समस्प्राक्षं
च संमदं ॥ अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कंकणप्रायप्रेंखितभूरिभूषणरवैराघोषयत्यंबरं पीतच्छर्दितरक्त
कर्दमघनप्राग्भारघोरोल्लसद्व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति ॥ वाच्यवशात् ॥ मातंगाः किमु वल्गितै
ः किमफलैराडंबरैर्जंबुकाः सारंगा महिषा मदं व्रजथ किं शून्येषु शूरा न के ॥ कोपाटोपसमुद्भटोत्कटसटाकोटे रम. ५०

हिमारेः शनैः सिंधुध्वानिनिर्ह्रुतेस्कुरतिपतङ्कुर्जितं गर्जितं॥ अत्र सिंहेवाक्येपनुषाः रादाः॥ प्रकरणवशात्।
यथा रक्ताशोककशोहरीक्वनुगतात्यक्तान्तरक्तं जनं नोद्वेषेति मुग्धे वचालपासि किं वा तावद्धन्तं शिरः॥ उत्के
टाघटमानषट्टदघटासंघट्टस्वच्छदन्तत्याहाहन्ति मां तरेणभवतः पुष्पोद्गमोयं कुतः॥ अत्रोरोविघट्टन
नेन कुपितस्य वचसि॥ क्वचिन्नीरसे न गुणो न दोषः॥ यथा॥ शीर्णघ्राणांघ्रिपाणीन्व्रणिभिरपघनैर्घर्घराव्यक्त
घोषान्दीर्घाघ्रातानघाघैः पुनरपि घटयत्येकउल्लाघयन्यः॥ घर्मांशोस्तस्य चोतर्द्विगुणघनघृणानिघ्ननि
र्विघ्नवृत्तेर्हंताघीः सिद्धसंघैर्विदध्यात्तु घनाः शीघ्रमंहोविघातं॥ अत्र प्रयुक्तनिहतार्थोश्लेषाहीनदुष्टो॥
यथा येन ध्वस्तमनोभवेन बलिजित्कायः पुरा स्त्रीकृतो यश्चोद्वृत्तभुजंगहारवलयो गंगां च योधारयत्॥ यस्याहुः
शशिमच्छिरोहर इति स्तुत्यं च नामामराः पायात्स स्वयमंधकक्षयकरः सर्वदो माधवः॥ अत्र माधवपक्षे शश
शिमथंधकक्षयकरशास्त्रावप्रयुक्तनिहतार्थो॥ अप्रतीतं क्वचिद्गुणो यथा॥ स्तुरताराभगोष्ठ्या॥ तावल्लहानेविधि
नाविसर्जेहृदयस्याव्यपदेशः पिस्तुनयच्चेरहस्यवस्त्विति कामशास्त्रस्थितो॥ करिहस्तेनसंबाधे प्रविश्यांतर्विलो
डिते॥ उपसर्पन्ध्वजः पुंसः साधनांतर्विराजते॥ अत्र मकेयास्मुउन्नातो छूनमंदकपाटितोहरसन्निमे॥ लो
हिनीस्त्रीव्रणोसाक्रिरक्रिमेः कस्पजायते॥ निर्वीणावैरेहतनाः प्रशामाहरीरसांनेहंतुपोदुतनयाः सहमाधवे

ना॥ रक्तप्रसाधितभुव८ क्षतविग्रहाश्च स्वस्थाभवंत्कुत्रराजसुता८ सभृत्या८॥ अत्र भावस्य मंगलस्य चकं संदि
ग्धमपि वाच्यमहिम्ना कश्चिन्नियतार्थप्रतिपत्तिकरत्वेव्याजस्तुतिपर्यवसायित्वेगुणोयथा॥ पश्चात्पर्यस्य कापा
त्रं भूषितनि८ शेषपरिजनं देव॥ विलसत्करेणुगहनं संप्रतिसममावयो८ सदनं॥ प्रतिपाद्यप्रतिपादकयोर्वैव
सत्यप्रतीतो गुणा८॥ यथा॥ आत्मारामा विहितरतयो निर्विकल्पे समाधौ ज्ञानोद्रेकाद्विघटिततमोग्रंथय८ सत्व
निष्ठा८ यं वीक्षंते कमपि तमसां ज्योतिषां वा परस्तात्तं मोहांध८ कथमयममुं वेत्ति देवं पुराणं॥ स्वयं वा परामर्शेय
था॥ षडधिकदशनाडीचक्रमध्यस्थितात्मा हृदि विनिहितरूप८ सिद्धिदस्तद्विदां य८॥ अविचलितमनोभि८ साधकै
र्मृग्यमाण८ स जयति परिणद्ध८ शक्तिभि८ शक्तिनाथ८॥ अधमप्रकृतियुक्तिषु ग्राम्यो गुणा८॥ फुल्लुकं ककलम
करसमं वहंति जे सिंदुवारविडवा मह वल्लहा ते॥ जे गालिदस्स महिसीदहिणो सरिस्सा ते किंच मुद्धविअइल्ल
पसूणपुंजा॥ अत्र कलमभक्तमहिषीदधिशब्दा ग्राम्याअपि विदूषकोक्तौ॥ न्यूनपदं क्वचिद्गुणो यथा॥ गाढा
लिंगनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा सांद्रस्नेहरसातिरेकविगलच्छ्रीमन्नितंबांबरा॥ मा मा मानद माति मामल
मिति क्षामाक्षरोल्लापिनी सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किं॥ कचिन्न गुणो न दोषो८॥ य
था तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मन८॥ तां हर्तुं विबु

धहिक्षोपिव्यतमेशक्ता ४ पुरोवर्त्तिनासाचात्यंतमगोचरंनयनयोर्यातेतिकोयंविधिः४॥ अत्रापिहितेस्यातोनंतरनैनदृश्यतर
स्यैतेन्द्रनै४पदैर्विशेषवद्दूरकरणान्नगुणः४॥उक्ताप्रतिपत्तिः४पूर्वांप्रतिपत्तिंवाधतइतिनदोषः४॥ अधिकंपदंक्वचि
द्गुणः४॥यथा॥यद्वंचनाहितमतिर्बहुचाटुगर्भंकार्योन्मुखः४खलजनः४कृतकंब्रवीति॥तत्साधवोननविदंतिविदंति
विदंतिकिंतुकर्तुंवृथाप्रणयमस्यनपारयंति॥अत्रवदंतीतिद्वितीयमन्ययोगव्यवच्छेदपरं॥यथावा॥वदवदजितः४
सशत्रुर्नहतोजल्पंश्चतववास्मीतिचित्रंचित्रमरोदीहाहेतिपरंमृतेपुत्रेऽइत्येवमाहोलर्षभयाहियुक्तेवक्रोशि॥क
थितपदंगुणोलाटानुप्रासेअर्थांतरसंक्रमितवाच्येविहितस्यानुवाद्यत्वेच॥क्रमेणोदा॰ सितकरकररुचिरविभावि
भाकराकारधरणिधरकीर्त्तिः४॥पौरुषकमलाकमलासापितवैवास्तिनान्यस्य॥तालाजायंतेगुणाजालातेसहृदयै
हिघेप्पंति॥रइकिरणाणुग्गहिआइंहोतिकमलाइंजितेहिंयत्वंविनयस्यकारणंगुणप्रकर्षोविनयादवाप्यते॥गुणप्र
कर्षेणजनोनुरज्यतेजनानुरागप्रभवाहिसंपदः४॥पतत्प्रकर्षमपिक्वचिद्गुणः४यथा॥उद्दात्तेतेप्रागप्राप्तेत्यादौ॥स
माप्तपुनरात्तंक्वचिन्नगुणोनदोषः४यत्रनविशेषणमात्रदानार्थंपुनर्ग्रहणमपितुवाक्यांतरमेवक्रियते॥यथाऽत्रे
वप्रागप्राप्तेत्यादौ॥अपदस्थसमासंक्वचिद्गुणः४॥यथा॥उद्धात्तेत्यत्रकाशोकेत्यादौ॥गर्भितंतथैव॥यथा॥हुमिअवह
त्थिअरेहोणिरंकुसोअहविवेअरहिओवि॥सिविणेवितुमम्मिपुणोपत्तिहिभत्तिंणपसुमरामि॥अत्रप्रतीहीतिमध्येः२८

का॰प्र॰ प्रत्ययोत्पादनाय स्वमन्यदपि लक्ष्यासे दृश्यं। व्यभिचारिरसस्थायिभावानां शब्दवाच्यता॥ कष्टकल्पनया व्यक्तिरनुभावविभा
५२ वयोः। प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः॥ अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः। अङ्गिनोऽननुसंधा
52 नं प्रकृतीनां विपर्ययः॥ अनङ्गस्याभिधानं च रसे दोषाः स्युरीदृशाः॥ स्वशब्दोपादानं व्यभिचारिणो यथा॥ सव्रीडा दय
ितानने सकरुणा मातङ्गचर्माम्बरे सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि॥ सेर्ष्या जह्नुसुतावलोकनविधौ दी
ना कपालोदरे पार्वत्या नवसंगमप्रणयिनी दृष्टिः शिवायास्तु वः॥ अत्र व्रीडादीनां वाच्यत्वं। व्यानम्रा दयितानने मुकु
लिता मातङ्गचर्माम्बरे सोत्कम्पा भुजगे निमेषरहिता चन्द्रेऽमृतस्यन्दिनि॥ मीलद्भ्रूः सुरसिन्धुदर्शनविधौ म्लाना कपालोद
रे इत्यादि तु युक्तं॥ रसस्य स्वशब्देन शृङ्गारादिशब्देन वा वाच्यत्वं॥ अनुभावाः पर्यवसायिनः स्थिता इति कष्टकल्पना परि
हरति। रतिं मतिं लुनीते स्खलतितरां परिवर्तते च भूयः॥ इति वत निषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्म
ः॥ अत्र रतिपरिहारादीनामनुभावानां करुणादावपि संभावात् कामिनीरूपो विभावो यत्नेन प्रतिपाद्यः॥ प्रसा
दे वर्त्तस्व प्रकटय मुदं सन्त्यज रुषं प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते। क्रमेणोदा॥ तां मतंगजपमंगलश्रियं किंचिदुच्चभुज
मूललोकितां॥ नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः॥ आलोक्य कोमलकपोलतलाभिषिक्तव्य राम॰
क्तानुरागसुभगामभिराममूर्त्तिं॥ पश्यैष बाल्यमतिवृत्य विवर्त्तमानः शृङ्गारसीमनि तरंगितमातनोति॥ स्थायिनो य ५२

या॥ संप्रहारे प्रहरणैः प्रहाराणां परस्परं। ठत्कारैः श्रुतिगतैरुत्साहस्तस्य कोऽभवत्॥ अत्रोत्साहस्य। कर्पूरधूलि
धवलद्युतिपूरधौतदिङ्मंडले शिशिररोचिषि तस्य यूनः॥ लीलाशिरोंऽशुकनिवेशविशेषक्लृप्तिव्यक्तस्तनोन्नति
रभून्नयनावनौ सा॥ अत्रोद्दीपनालंबनरूपाः शृंगारयोग्या विभावा अनुभावा अनुपर्यवसायिनः स्थिता इति कष्टकल्पना॥
परिहरति रतिं मतिं लुनीते स्खलति तरां परिवर्त्तते च भूयः॥ इति वत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः॥
अत्र रतिपरिहारादीनामनुभावादीनां करुणादावपि संभवात्कामिनीरूपो विभावो यत्नतः प्रतिपाद्यः॥ प्रसादे वर्त्त
स्व प्रकटय मुदं संत्यज रुषं प्रिये शुष्यंत्यंगान्यमृतमिव ते सिंचतु वचः॥ निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं
न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः॥ अत्र शृंगारे प्रतिकूलस्य शान्तस्यानित्यताप्रकाशनरूपो विभावस्तत्प्रकाशि
तो निर्वेदो व्यभिचार्युपात्तः॥ णिहुअरमणम्मि लोअणपहम्मि पडिए गुरुअणमज्झम्मि। सअलपरिहारहिअआ वणगमण
मेव महइ वहू॥ अत्र सकलपरिहारतिभ्रत्तरमणो लोचनपथे पतिते गुरुः॥ गणमध्ये सकलपरिहारशीला वनगमनमभिष्ट
तिवधूः॥ वनेगमने ज्ञातानुभावौ॥ इदं ध्वनाननपनव्योजेन चागमनं चेन्न दोषः॥ दीप्तिः पुनः पुनः॥ यथा कुमारसंभवे रति
प्रलापेषु॥ अकाण्डे प्रथनं यथा॥ वेणीसंहारे द्वितीयेंऽके अनेकसंक्षयप्रवृत्ते भानुमत्या सह दुर्योधनस्य॥ शृंगारवर्ण
नेच्छेदो यथा वीरचरिते द्वितीयेंऽके राघवभार्गवयोर्धारोधिरूढे वीररसे कंकणमोचनाय गच्छामीति राघवस्योक्तौ॥ अंग

का.प्र. स्याप्रधानस्य अतिविस्तरेणावर्णनंयथा॥ हयग्रीववधे हयग्रीवस्यांगिनोऽननुसंधानंयथा॥ रत्नावल्यांतुर्यंके वाभ्रव्या
५२ गमने सागरिकाया विस्मृतिः॥ प्रकृतयो दिव्या अदिव्याः दिव्यादिव्याश्च। वीररौद्रशृंगारशांतरसप्रधाना धीरोदात्तधीरो
53 द्धतधीरललितप्रशांता उत्तमाधममध्यमाश्चेति। रतिहासशोकाद्भुतान्यदिव्योत्तमप्रकृतिवद्दिव्येष्वपि किंतु रतिः संभोगशृं
गाररूपा उत्तमदेवताविषया न वर्णनीया॥ तद्वर्णनं हि पित्रोः संभोगवर्णनमिवात्यंतमनुचितं। क्रोधं प्रभो संहर संह
रेति यावद्गिरः खे मरुतां चरंति॥ तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार॥ इत्युक्तवद्भ्रुकुट्यादिविकारव
र्जितः सद्यः फलदः क्रोधः॥ स्वः पातालगमनसमुद्रोल्लंघनाद्युत्साहो दिव्येष्वेवाऽदिव्येषु तु यावदवदानं प्रसि
द्धमुचितं वा तावदेवोपनिबद्धव्यं॥ अधिकं तु निबध्यमानमसत्यत्वेन प्रतिभासेन नायकवद्वर्तितव्यं न प्रतिनायक
वदित्युपदेशेन पर्यवस्येत्। दिव्यादिव्येषु तूभयथापि। एवमुक्तस्यौचित्यस्य दिव्यादीनामिव धीरोदात्तादीनाम
प्यन्यथावर्णनं विपर्ययः॥ तत्र भवन्भगवन्निति उत्तमेन नाधमेन मुनिप्रभृतौ न राजादौ भट्टारकेति। परमेश्वरेति च
न मुनिप्रभृतौ प्रकृतिविपर्ययापत्तेर्वाच्यं॥ एवं देशकालवयोजात्यादीनां वेषव्यवहारादिकमुचितमेवोपनिबद्ध
व्यं॥ अकृतेऽंगस्य रसानुपकारकस्य वर्णनं यथा॥ कर्पूरमंजर्यां नायिकया स्वात्मना च कृतं वसंतवर्णनमनादृत्य वं रा.म.
दिवर्णितस्य तस्य राज्ञः प्रशंसनं॥ ईदृशा इति। नापि कायादिप्रहारादिना नायककोपादिवर्णनं॥ उक्तं हि ध्वनिकृ ५२

ता। अतोनौचित्याद्दृतेनान्यद्रसभंगस्य कारणं॥ प्रसिद्धौचित्यबंधस्तु रसस्योपनिषत्परेति। इदानीं कश्चिद्दोषा अप्येत
इत्युच्यंते। तद्दोषः स्वपदेनोक्तावपि संचारिणः क्वचित्॥ यथा। औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्तमाना ह्रिया तैस्तैर्बं
धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः। दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे संरोहत्पुलका हरेण हसता श्लिष्टा
शिवायास्तु वः॥ अत्रौत्सुक्यशब्दस्तदनुभावो न तथा प्रतीतिकृत्॥ अत एव दूराकृष्टसमित्यादौ व्रीडादेरनुभावानां विव
लितत्वादीनामिवौत्सुक्यत्वानुभावस्य सहसा प्रसरणादे रूपस्य तथा प्रतिपत्तिकारित्वाभावादुत्सुकमिति कृतं॥ स चापि हर्षवि
रुद्धस्य बाध्यस्योक्तिर्गुणावहा। बाध्यत्वेनोक्तिर्न परं न दोषो यावत्प्रकृतरसपरिपोषकृत्॥ यथा। क्वाकार्यं शशलक्ष्मणः
क्व च कुलमित्यादावत्र वितर्कादिषूद्भूतेष्वपि चिंतायामेव विश्रान्तिरिति प्रकृतरसपरिपोषः॥ पांडुक्षामं वदनं हृद
यं सरसं तवालसं च वपुः आवेदयति नितांतं क्षेत्रियरोगं सखि हृदन्तः इत्यादौ साधारणत्वेन पांडुताहीनामिति न विरुद्धं।
सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः॥ किंतु मत्तांगनापांगभंगलोलं हि जीवितमित्यत्र धर्मस्य बाध्यत्वेनैवोक्तेः॥ जीवि
ताद्यप्यधिकस्यापांगभंगस्यास्थिरत्वमिति प्रसिद्धं गरीयसा न तयोपात्तेन सदृष्टान्तमेव पुष्णाति॥ न पुनः शृंगाररसस्यात्र प्र
तीतिः॥ तद्गमप्रतिपत्ते नतु विनयोन्मुखीकरणमत्रापरिहार्यः॥ शान्तशृंगारयोरनैरंतर्यस्याभावात्॥ नापि काव्य
शोभाकरणं रसान्तरानुप्रासमात्राद्भूतथाभावात्॥ आश्रयैक्ये विरुद्धो यः स कार्यो भिन्नसंश्रयः॥ रसान्तरेण

तरितो नैरंतर्येण यो रसः।। वीरभयानकयोरेकाश्रयत्वेन विरोध इति प्रतिपक्षगतत्वेन भयानको निवेशयितव्यः। शांतशृंगा
रयोर्नैरंतर्येण विरोध इति रसांतरमंतरे कार्यं। यथा नागानंदे शांतस्य जीमूतवाहनस्य अहो गीतमहो वादित्रमित्यद्भुतमं
तर्निवेश्य मलयवतीं प्रति शृंगारो निबद्धः।। न परं प्रबंधे यावदेकस्मिन्नपि वाक्ये रसांतरव्यवधानाद्विरोधो निवर्त्तते
। यथा भूरेणुदिग्धान्नवपारिजातमालारजोवासितबाहुमध्याः।। गाढं शिवाभिः परिरभ्यमाणान्सुरांगनाश्लिष्टभु
जांतरालाः।। सशोणितैः क्रव्यभुजां स्फुरद्भिः पक्षैः खगानामुपवीज्यमानान्।। संवीजिताश्चंदनवारिसेकैः सुगंधिभिः
कल्पलतादुकूलैः।। विमानपर्यंकतले निषण्णाः कुतूहलाविष्टतया तदानीं। निर्दिश्यमानांल्ललनांगुलीभिर्वीराः स्व
देहान्पतितानपश्यन्।। अत्र बीभत्सशृंगारयोरंतरा वीररसो निवेशितः।। स्मर्यमाणो विरुद्धोपि साम्येनाथ विवक्षि
तः।। अंगिन्यंगत्वमाप्तौ यौ तौ न दुष्टौ परस्परं। यथा। अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।। नाभ्यूरुजघनस्प
र्शी।। नीवीविस्रंसनः करः।। एतद्भूरिश्रवसः समरभुवि पतितं हस्तमवलोक्य तद्वधूभिरभिहितं।। अत्र पूर्वा
वस्थास्मरणं शृंगारांगमपि करुणं परिपोषयति।। दंतक्षतानि करजैश्च विपाटितानि। प्रोद्भिन्नसांद्रपुलके भवतः शरी
रे।। दत्तानि रक्तमनसा मृगराजवध्वा जातस्पृहैर्मुनिभिरप्यवलोकितानि।। अत्र कामुकस्य दंतक्षतादीनि यथा चमत्का
रकारणानि। तथा जिनस्य यथा च परः स्मारी तदवलोकनात्सस्पृहस्तद्वदेतद्दर्शने मुनय इति साम्यविवक्षा।।

क्राम्यतः क्षतकोमलांगुलिगलद्रक्तैः सदर्भाः स्थलीः पादैः पातितयावकैरिव पतद्बाष्पांबुधौताननाः ॥ भी
ता भर्तृकरावलंबितकरास्त्वच्छत्रुनार्योऽधुना दावाग्निं परितो भ्रमंति पुनरप्युद्यद्विवाहा इव ॥ अत्र चाटुके राजवि
षयारतिर्या प्रतीयते तत्र करुण इवांगारोप्यगमिति तयोर्न विरोधः ॥ यथा । एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ॥ एव
माशाग्रहग्रस्तैः क्रीडंति धनिनोऽर्थिभिः ॥ इति अत्र एहीति । क्रीडंति गच्छेति क्रीडंतीति क्रीडनायेत्युपयोगमनागमनयोर्न विरो
धः ॥ ॥ क्षिप्तो हस्तावलग्नः प्रसभमभितोऽप्याददानोंऽशुकांतं गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ॥
आलिंगन्योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः ॥ इत्य
त्र त्रिपुररिपुभावातिशयस्य करुणोंगं ॥ तस्य तु शृंगारः ॥ तथापि न करुणे विश्रांतिरिति तस्यांगतैव ॥ अथवा प्राग्वद्यथा का
मुकस्त्वाचरंति स्म ॥ तथा च शराग्निरिति शृंगारपरिपोषिते न करुणो न मुख्य एवार्थ उपोद्बल्यते ॥ उक्तं हि गुणाः कृतात्मसं
स्काराः प्रधानं प्रतिपद्यते ॥ प्रधानस्योपकारे हि तथा भूयसि वर्तते इति ॥ प्राक्प्रतिपादितरूपस्य रसस्य रसांतरेण न विरोधो
नाप्यंगांगिभावो भवतीति रसशब्देनात्रस्थायिभाव उपलक्ष्यते ॥ ६२ ॥ ॥ इति काव्यप्रकाशे दोषदर्शनो नाम सप्तमउल्लास
ः ॥ ॥ एवं दोषानुक्त्वा गुणालंकारविवेकमाह ॥ ये रसस्यांगिनो धर्माः शौर्यादय इवात्मनः ॥ उत्कर्षहेतवस्ते स्युरच
लस्थितयो गुणाः ॥ आत्मन एव हि शौर्यादयो नाकारस्य यथा ॥ तथा रसस्यैव माधुर्यादयो न वर्णानां ॥ क्वचित्तु सौ

का.प्र. यौदिस्समुचितस्याकारमहत्त्वादेर्ङ्गि नाहाकारएवास्यस्मरइत्यादेर्व्यवहारादन्यत्रास्मरेयैविनताह्लतिस्वमात्रेणास्मरइतिका
५५ पिम्पूरे पिमर्त्तिलाघवमात्रेणास्मरइत्यविश्रांतप्रीतयोयथाव्यवहरंति॥तद्वन्मधुरादिरसव्यंजकस्तुकुमारवर्णानांमा
55 धुर्यव्यवहारप्रवृत्तेरमधुरादिरसांगानांसौकुमार्यादिमात्रेणामाधुर्यादिमधुरादिरसोपकारतानांतेषामसौकुमार्यादे
रमाधुर्यादिरसपर्यंतविश्रांतप्रतीतिवंध्याव्यवहारंति॥अतएवमाधुर्यादयोरसधर्माःसमुचितैर्वर्णैर्व्यज्यंतेनतुवर्णमा
त्राश्रया॥यथैषांव्यंजकत्वंतथोदाहरिष्यते॥उपकुर्वंतितंसंतंयेंगद्वारेणजातुचित्॥हारादिवदलंकारास्तेनुप्रासो
पमादयः॥येवाचकवाच्यलक्षणांगातिशयमुखेनमुख्यंरससंभविनमुपकुर्वंति।तेकंठाद्यंगानामुत्कर्षाधानद्वारे
णशरीरिणोपुपकारकाहारादयइवालंकाराः॥यत्रतुनास्तिरसःसउक्तिवैचित्र्यमात्रपर्यवसिताः॥क्वचित्तुसंतमपिनोप
कुर्वंति॥यथा॥अपसारयघनसारंकुरुहारंदूरएवकिंकमलैः॥अलमलमालिमृणालैरिति।वदतिदिनानिशंबाला॥इ
त्यादौवाचकमुखेनमनोरागःस्त्रीत्वं विषमिवविसर्पत्यविरतंप्रमाथीति धूमं ज्वलतिविधुतःपावकइवाहितस्तिप्रत्य
गंज्वरइवगात्राणितइतोनमातातातस्त्रातुप्रभवतिनचावानभवतीत्यादौवाच्यमुखेनालंकारौरसमुपकुरुतः॥चि
त्तेविहट्टदिनखुट्टदिसागुणोसेज्जासुलुट्टतिविसट्टदिदिदिद्ध-मुहेस्तुवोलम्मिवट्टदिपअट्टदिविअकवेघेअरागेनट्टदिचि
रंतरुणीतरहीइत्यादौवाचकमोवालित्रैत्रगिगतेसरोनट्टयनेतामत्यतिक्रहत्तउमरेणुवीस्यदयितासत्तंपुरःसोरस राम. ५५

म॥ वक्राद्रेनवियोगिनाविसलतानास्वाताम्नोक्तितावत्केवलमर्गालेवतिहिताजीवस्यनिर्गछत४॥इत्यादौवाच्यमेवननुरसं।
अत्रविसलताजीवेनिरोद्धुनक्षमेतिप्रकृताननुगुणोपमा॥एवमेवगुणालंकारप्रविभाग४॥एवंसमवायवृत्त्याशौर्यादयः
संयोगवृत्त्याहारादयइतिगुणालंकाराणांभेद४॥ओज४प्रभ्रतीनामनुप्रासोपमादीनांचोभयोषामपिसमवायवृ
त्त्यास्थितिरितिगड्डुरिकाप्रवाहेणोषांभेदकथनमित्यभिधानमसत्॥यदप्युक्तंकाव्यशोभाया४कर्तारोधर्मागुणास्तद
तिशयहेतवस्त्वलंकाराइतितदपिनयुक्तं।यत४॥किंसमस्तैर्गुणैर्गीरो४काव्यव्यवहारउतकतिपयैर्यदिसमस्तैस्तत्कथमस
मस्तगुणागौडीयापाञ्चालीरीति४काव्यंस्यात्।अथकतिपयैस्तदा॥अद्रावत्रप्रज्वलत्यग्निरुच्चै४प्रायनुल्लसत्येषधूम४॥
इत्यादौओज४प्रभ्रतिषुगुणेषुसत्सुकाव्यव्यवहारप्राप्ति४स्वर्गप्राप्तिरनेनैवदेहेनवरवर्णिनि।अस्यारदच्छदरसोन्यक
रोतितरांसुधाम्इत्यादौविशेषोक्तिव्यतिरेकौगुणनिरपेक्षौकाव्यव्यवहारप्रवर्तकौ॥इदानींगुणानामेवाह।मा
धुर्यौज४प्रसादाख्यास्त्रयस्तेनपुनर्दश॥यथाक्रमेणालक्षणमाह।आह्लादकत्वंमाधुर्यंशृंगारेद्रुतिकारणं॥शृंगारेऽर्था
त्संभोगेद्रुतिर्गलितत्वमिव॥श्रव्यत्वंपुनरोज४प्रसादयोरपि।करुणेविप्रलंभेतच्छान्तेचातिशयान्वितम्॥अत्यंतद्रु
तिहेतुत्वात्॥दीप्त्यात्मविस्तृतेर्हेतुरोजोवीररसस्थिति४॥चित्तस्यविस्ताररूपदीप्तत्वजनकमोज४॥वीभत्सरौद्ररस
योस्तस्याधिक्यंक्रमेणच॥वीराद्वीभत्सेततोपिरौद्रेसातिशयमोज४॥शुष्केन्धनाग्निवत्स्वच्छजलवत्सहसैवय४॥व्याप्नोत्य

का.प्र. त्वमसाहेसर्वत्रविहितस्मृति। अन्यद्दिशितव्याप्यामिह चिंतं॥ सर्वत्रेति। सर्वेषु रसेषुसर्वासु रचनासु चागुणाद्व्यापृतत्वमेषां
५६ वृत्ति४ शब्दार्थयोर्मता॥ गुणावृत्त्या उपचारेणतेषांगुणानां। आकारे शौर्यस्येवकुतस्त्यय एव नहशोयाहकिंचिदत्रभेव
56 स्येयद्दोषत्यागात्युरेथ्रिताः॥ आत्मेभजेत्तिदोष त्वंकुत्रचिन्नतत्तो हशातथाहि बहूनामपिपदानामेकपदवद्भासनात्या
प४ श्लेषः यथ्याशेहाचरोहक्रमनरूप४ समाधिर्पचविकटकत्वलक्षणोदारताय श्चौजोमिश्रित४ शोधित्यात्माप्रसा
दस्तेषामोजास्यतर्माव४॥ यथकूपदत्वरूपंमाधुर्यंभंग्यासाक्षाद्दुपात्तम्। प्रसादेनार्थव्यक्तिर्गृहीता॥ मार्गाभेदरूपा
समताक्वचिद्दोष४। तथ्याहिमातंगाः किमुवल्गितैरित्यादौसिंहाभिधानेमसृणमार्गत्यागोगुण४ कष्टत्वग्राम्यत्व
योदुष्टताभिधानात्तन्निराकरणेनायानुष्यरूपंसौकुमार्यमौज्वल्यरूपाकान्तिश्चस्वीकृता॥ एवंनदशशब्दगुणा४॥
पदार्थेवाक्यरचनेवाक्यार्थेचपदाभिधा॥ प्रौढिर्व्याससमासौचेतिप्रौढिरोजइत्युक्तं। तदेचित्र्यमात्रंनगुणा४॥ त
दभावेपिकाव्यव्यवहारप्रवृत्ते४। अपुष्टार्थत्वाधिकपदत्वानवीकृतत्वामंगलरूपाश्लीलग्राम्याणांनिराकरणेनसा
भिप्रायत्वरूपमोजोर्थवैमल्यात्मा प्रसाद४। उक्तिवैचित्र्यरूपंमाधुर्यमपारुष्यरूपंसौकुमार्यमग्राम्यत्ववपुरुदारता च
स्वीकृता। अभिधानस्यमानस्वभावो न्यूनलंकारेणारमधनिग्रणीस्तत्वव्यंग्याभ्यां वस्तुस्वभावस्फुटत्वरूपार्थव्यक्तिर्हीत्वरस रामः
त्वरूपाकान्तिस्वीकृतोक्रमकौटिल्यानुल्बणोपपत्तियोगरूपघटनात्मा श्लेषोविचित्रत्वममात्रम्॥ अवैषम्यरूपासमता ५६

द्वेषाभावमात्रेण गुणत्व॥ कथं तर्हि उन्मत्तोन्यप्रस्तावेऽन्यदभिदध्यात्॥ अपार्थस्यापि नैरन्तर्यच्छायायोगेन वा। यदि न भवति ह
अनिन्तः कथं काव्यमिति अपार्थद्विरूपसमाधिरपि न गुणत्व॥ तेन नार्थगुणा वाच्या॥ वाच्याः व क्तुन्यायाः प्रोक्ताः शब्दगुणाश्च
ये॥ वर्णाः समासो रचना तेषां व्यंजकतामिताः॥ के कस्येत्याह॥ मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू। अवृत्तिर्मध्यव
त्तिर्वा माधुर्ये घटना तथा॥ टठडढवर्जवर्गाः कादयो मान्ताः॥ शिरसि निजवर्गान्त्ययुक्ताः॥ तथा रेफणकारौ ह्रस्वान्तरिता
विति वर्णाः॥ समासाभावो मध्यमः समासो वेति समासः। तथा माधुर्यवती पदान्तरयोगेन रचना माधुर्यस्य व्यंजिका। उदाहर
णं यथा॥ अनंगरंगप्रतिमं तदंगं भंगीभिरंगीकृतमानतांग्याः॥ कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि
॥ योग आद्यतृतीयाभ्यामन्त्ययोः रेण तुल्ययोः॥ टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि॥ वर्गप्रथमतृतीयाभ्यां द्वितीयचतु
र्थयो रेफेण अधउपरि उभयत्र वा यस्य कस्यचित् तुल्ययोस्तेन तस्यैव संबंधः। टवर्गोऽथात् णकारवर्जः॥ शकारषकारौ दी
र्घसमासो विकटा संघटना ओजसः॥ उदाहरणं॥ मूर्ध्नामुद्वृत्तकृत्तेत्यादि। श्रुतिमात्रेण शब्दानां येनार्थप्रत्ययो भवेत्॥ सा
धारणः समग्राणां स प्रसादो गुणः स्मृतः॥ समग्राणां रसानां संघटनानां च उदाहरणं॥ यस्मिन्नानं पीनस्तनजघनसं
गादुभयतस्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितं। इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशाङ्ग्याः संतापं
वदतीति बिसिनीपत्रशयनं॥ यद्यपि गुणपरतन्त्राः संघटनादयस्तथापि च॥ वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित्॥

का॰प्र॰ चनादृत्तिवर्णानामन्यथात्वमपीष्यते॥ क्वचिद्वाच्यप्रबंधानपेक्षयापि वक्त्रौचित्यादेव रचनादयः॥ यथा॥ मंथायस्तार्णवांभः
५७ प्लुतिकुहरवलन्मंदरध्वानधीरः कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचंडः। कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पा
57 तनिर्घातवातः केनास्मत्सिंहनादप्रतिरसितसखो दुंदुभिस्ताडितोयम्॥ अत्र न हि वाच्यः क्रोधाभिव्यंजकः॥ अभिनेयार्थं च का
व्यमिति तत्प्रति कृत्वा उद्धता रचनादयः॥ वक्ता चात्र भीमसेनः॥ क्वचिद्वक्तृप्रबंधानपेक्षया वाच्यौचित्यादेव रचनादयः॥
प्रौढच्छेदानुरूपोच्छलनरयभवत्सैंहिकेयोपघातत्रासाकृष्टाश्वतिर्यग्वलितरविरथेनारुणेनेक्ष्यमाणम्॥ कुर्वत्का
कुत्स्थवीथीस्तितिमिवमउतांकं धरारंध्रमाजौ॥ झंत्कारैर्भीममेतन्निपतति वियतः कुंभकर्णोत्तमांगम्॥ क्वचिद्वक्तृवा
च्यानामनपेक्षया प्रबंधौचित्यादेव तथा आख्यायिकायां शृंगारेपि न मसृणाः॥ कथायां रौद्रेपि नात्यंतमुद्धताः॥
नाटकादौ रौद्रेपि न दीर्घसमासादयः॥ एवमन्यदप्यौचित्यमनुसर्तव्यं॥ ॥इति काव्यप्रकाशे गुणालंकारभेदनियतगु
णातिरीपो नामाष्टमउल्लासः॥ ॥गुणौ विवेचितेलंकाराः प्राप्तावसरा इति शब्दालंकारानाह॥ यदुक्तमन्यथा वाक्य
मन्यथान्येन योज्यते श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा॥ तयेति श्लेषवक्रोक्तिः॥ काकुवक्रोक्तिश्च॥ तत्र
पदभंगश्लेषेण यथा॥ नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो वामानां प्रियमादधाति हितकृन्नैवाबलानां ए॰म॰
भवान्॥ युक्तं किं हितकर्तनं ननु बलाभावप्रसिद्धात्मनः सामर्थ्यं भवतः पुरंदरमतच्छेदं विधातुं कुतः॥ अभंगश्ले ५७

षेण यथा। अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता। त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्॥ काक्वा यथा। गुरुजनपरतंत्रतया
दूरतरं देशमुद्यतो गंतुं॥ अलिकुलकोकिलललिते नैष्यति सखि सुरभिसमयेऽसौ॥ वर्णसाम्यमनुप्रासः स्वरवैसादृश्येऽपि व्यं
जनसदृशत्वं वर्णसाम्यं॥ रसाद्यनुगतः प्रकृष्टो न्यासोऽनुप्रासः॥ छेकवृत्तिगतो द्विधा। छेका विदग्धाः वृत्तिर्नियतवर्ण
गतो रसविषयो व्यापारः॥ गत इति। छेकानुप्रासो वृत्त्यनुप्रासश्चेति। किं तयोः स्वरूपमित्याह। सोऽनेकस्य सकृत्पूर्वः।
अनेकस्यार्थाद्व्यंजनस्य सकृदेकवारं सादृश्यं छेकानुप्रासः। उदाहरणं। ततोऽरुणपरिस्पंदमंदीकृतवपुः शशी॥ द
ध्रे कामपरिक्षामकामिनीगंडपांडुतां॥ एकस्याप्यसकृत्परः। एकस्य अपि शब्दादनेकस्य व्यंजनस्य द्विर्बहुकृत्वो वा साद
श्यं वृत्त्यनुप्रासः। तत्र। माधुर्यव्यंजकैर्वर्णैरुपनागरिकेष्यते। ओजःप्रकाशकैस्तैस्तु परुषा। उभयत्रापिग्राहात्तां कोमला
परैः॥ परैः शेषैः। तामेव केचिद्ग्राम्येति वदंति। यथा। अपसारय घनसारं कुरु हारं दूर एव किं कमलैः॥ अलमलमालि मृ
णालैरिति वदति दिवानिशं बाला। केषांचिदेता वैदर्भीप्रमुखा रीतयो मताः॥ एतास्तिस्रो वृत्तयो वामनादीनां मते वैदर्भीगौडी
पांचाल्याख्या रीतय उच्यंते॥ शब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः॥ शब्दगतोऽनुप्रासः शब्दार्थयोरभेदेऽपि तात्पर्यमात्रभेदा
ल्लाटानुप्रासः। एष पदानुप्रास इत्यन्ये। पदानां सः। स इति लाटानुप्रासः। यथा। यस्य न सविधे दयिता दवदहनस्तुहिन
दीधितिस्तस्यापदस्यापि। अपि शब्देन सदृशतिसमुच्चीयते। उदाहरणं। वक्त्रं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः सुधाकरः

का.प्र. क्ततुपनः कलकलं कविकलोभवेत्। इत्थावन्यत्रतत्रवा। तानि च सह स्थानयोः पादयोः एकस्मिन्नपि समासे भिन्ने वा समासे समासयोर्वा ना
५८ म्नः। प्रातिपदिकस्य ननु पदस्य सा न स्यां। सितकरकर उचिर विभाविभाकरा कारधर। राधरकीर्तिः। पौरुषकमला कमला सापि
58 तवैवास्ति नान्यस्यात्तदेवं पंच धामनः। अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः। यमकं समरसमोयमित्याद्यावेके
षामर्थवत्त्वेऽन्येषामनर्थकत्वे भिन्नार्थानामिति तिन्तवुच्यते वक्ष्यमित्यर्थे सतीयुक्तम्॥ सेति सरोरुहं इत्यादिवैतल्ल क्षणेपनतेनैवक
मेण स्थितानां॥ पादतद्भागवृत्ति तद्यात्यनेकतां॥ प्रथमो द्वितीयादौ द्वितीयस्तृतीयादौ तृतीयश्चतुर्थे प्रथमस्त्रिष्वपीति। स
प्रथमो द्वितीये तृतीयश्च तुर्थ इति॥ प्रथमश्चानुर्ये द्वितीयस्तृतीय इति द्वेतदेवं यमकेन सप्तभेदाः। अर्द्धावृत्तिः श्लोकावृत्तिश्चेति
द्वे द्विधा विभक्ते पादे प्रथमादिपादादिभागः। एवं च द्वितीयादिपादादिभागेष्वंतभागेऽन्तभागेष्विति विंशतिभेदाः। श्लोकांतरे हि
नभागावृत्तिः। त्रिखंडे त्रिंशत्। चतुःखंडे चत्वारिंशत्। प्रथमपादादिगतान्त्यार्द्धादिभागो द्वितीयपादादिगत आद्यादिभागे यम्य
त इत्याद्यर्त्वावृत्तानुसारेणानेकभेदाः। अन्त्यादिकमाद्यंतिकं तत्समुच्चयः। मध्यादिकमादिमध्यमंतमध्यांतिकं तेषां समुच्चयः॥
तथा तस्मिन्नेव पादे आद्यादिभागानां मध्यादिभागेष्वनियते च स्थाने आवृत्तिरिति प्रभूततमभेदम्॥ तदेतत्काव्यांत
दुर्भूतमिति नास्य भेदलक्षणं कृतमिति। दिङ्मात्रं तूदाहियते। सन्नारीभरणोमायमाराध्य विधुशेखरं। सन्नारीभर राम:
णोमायस्ततस्त्वं पृथिवीं जय॥ विनायमेनोऽनयतासुखादिना। विनायमेनोनयतासुखादिना॥ महाजनो दीयते मा ना ५८

साहं महाजनोऽ शीपतमानसा हरे ॥ सत्तां रंभरतोऽ वश्यमवलम्बितनतारवं सर्वहारराम सा नैषां ह्वानलसम स्थितस्थ ।
अनंतमहिमव्याप्तविश्वां वेधा न वेद यां ॥ या च मातेव भजते प्रणते मानवे दयां ॥ यदा ननोऽ यद्दानतो तया त्वयं नया
त्ययं शिवे हितो । शिवे हितोऽस्मरामि तां स्मरामि तां ॥ स्मरस्वनि फ प्रसादस्मे स्थितिरविन्नस्मरस्वति सरस्वति कुञ्जे च कु
ञ्जे च सरस्वति ॥ ससारसा के हर्ष्ये रणा कं हर्ष्येरा ससारसा ॥ सरन्नवा नाविभ्राराणा ना विभ्राराणा शरन्नवा ॥ मधुपराजि पराजि
तमानिनो जनमनः स्मरमनः सुरभिश्रियं ॥ अमरवारिजविलंबस्वरितताम्रततान्नवरां जगत् ॥ एव वैचित्र्यसहः स्नेहः
स्थितमन्यद् न्नेयं । वाच्यभेदेन भिन्ना पपुगपन्नाषस्य शः । श्लिष्यति शब्दाः श्लेषो साव स्मरा इमिरष्टधा । अर्थभेदेन
शब्दभेदः इति दर्शने काव्यमार्गे स्वरो न गण्यत इति चेत् मे वाच्यभेदेन भिन्ना अपि शब्दाः युगपदुच्चारणेन श्लिष्यन्ति
भिन्नस्वानेपम यहवतो सश्लेषः । स च वर्णप्रत्ययलिंगभाषाप्रकृतिप्रत्ययविभक्तिवचनानां भेदादष्टधा क्रमेणो
दाहरणं । अलंकारः शंकाकरनरकपालं परिमनोविशीर्णाङ्गो भंगी वसुचयष्टव एकोगतवपाः ॥ अवस्थेयं स्थाणो
रपि भवति सर्वामरगुरोर्विधौ वक्रे मूर्ध्नि स्थितं वितवपके पुनः मी ॥ पृथुकार्त्तस्वरपात्रं भूषितनिःशेषपरिजनं देव । वि
लसत्करेणुगहनं संप्रति सम वायपयोः सदनं ॥ मा भक्तिपद्रवि लोकनप्रणयिनी नीलोत्पल स्पर्द्धिनी ध्यानालम्बनतां स
माधिनिरतैर्नीते हितप्राप्तये ॥ लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती युष्माकं कुरुतां भवार्त्तिशमनं नेत्रे तनुर्वा

का.प्र. हरेइत्यत्र वचने श्लेषोऽपि॥ महदे सुरसंधंमे तमव समासंगमागमाहरणो हर बहुसरणं तं चित्तमोहमवसर उमे सहसा॥
५६ अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु वक्ष्यति। सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः॥ रजनिरमणमौ
59 लेः पादपद्मावलोकक्षणसमयपराप्तापवर्गसंपत्सहस्रप्रमथनिवहमध्ये जातु विद्वत्प्रसादादहमुचितउचितस्यान्नन्दिता
त्मा तथा मे॥ सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः। नयोपकारसांमुख्यमायासि तनुवर्तनं॥ मेहाभावासमकल्पाइमेऽदोषि
नवमोमवेत॥ नवमोऽपि त्यपि भिन्नक्रमो यास कृत्य गोत्राणां पक्षच्छेदक्षणक्षमः॥ शतकोटिदतां बिभ्रद्विबु
धेन्द्रः स राजते॥ अत्र प्रकरणादिनियमाभावाद्द्वयोरप्यर्थयोर्वाच्यो तनुस्फुरितादिगुणाभेदाद्भिन्नप्रयत्नोच्चार्याणां तद
भेदादभिन्नप्रयत्नोच्चार्याणां च शब्दानां बन्धेऽलंकारान्तरप्रतिभोत्पत्तिहेतुः शब्दश्लेषोऽर्थश्लेषश्चेति द्विधोऽपमर्थालंका
रमध्ये परिगणितोऽन्यैरिति कथमयं शब्दालंकार इत्युच्यते। इह दोषगुणालंकाराणां शब्दार्थगतत्वेन यो विभागः सो
न्वयव्यतिरेकाभ्यामेव व्यवतिष्ठते। तथा हि कष्टत्वादि गाढत्वादि अनुप्रासादयो व्यर्थत्वादि प्रौढ्युपमादयः॥ त
द्भावतद्भावानुविधायित्वादेव शब्दार्थगतत्वेन व्यवस्थाप्यन्ते तथा हि। स्वपक्षच पल्लवाताम्रभास्वत्करविराजिताद्
त्याभङ्ग श्लेषः प्रभातसंध्येवास्वापफललुब्धेहितप्रदेति सभंगशब्दश्लेषश्चेति द्विविधोऽप्ययं शब्दैकसमाश्र राम.
याविति द्वयोरपि शब्दश्लेषत्वमुपपन्नं॥ न त्वाद्यस्यार्थश्लेषत्वं। अर्थश्लेषस्य तु स विषयो यत्र शब्दपरिवर्तनेऽपि न ५६

नश्लेषत्वं खंडनात् ॥ घोरस्त्रीके मोन्नतिमायाति मायाति लोकेनायात्यधोगतिं ॥ अहोस्तु सदृशी वृत्तिस्तुलाकोटेः खलस्य वे
ति न वाच्यमुपमाप्रतिभोत्पत्तिहेतुः श्लेषप्रतिभोत्पत्तिहेतुरुपमा ॥ तथा हि ॥ यथा कमलमिव मुखं मनोज्ञमेतत्कचाति त
रामित्यादौ गुणस्य साम्ये क्रियासाम्ये उभयसाम्ये वोपमा तथा समकलकलं पुरमेतज्ज्ञातं संप्रति सितांशुबिंबमिवेत्यादौ
शब्दमात्रसामान्यमिहापि संभवतीति । न च कमलमिव मुखमित्यादिसाधारणधर्मप्रयोगाभावे उपमाया विषय इति
युक्तं वक्तुं ॥ पूर्णोपमाया अपि विषयत्वापत्तेः ॥ देवत्वमेव पातालमाशानां त्वं निबंधनं ॥ त्वं चामरमरुद्भूमिरेको लो
कत्रयात्मकः इत्यादौ श्लेषस्य चोपमाद्यलंकारविविक्तो विषयोस्तीति । द्वयोर्योगे संकरत्वं उपपत्तियुक्तं लोचने नु उ
पमोपायत्वापयुक्तो विषयः । अन्यथा तिष्यापहारत्वप्रसंगो उपमायाः स्यात् । न च अविदुसहरी नित्यं गतत्वावराप विं
दुकेत्यादौ विरोधप्रतिभोत्पत्तिहेतुः श्लेषः अपि तु श्लेषप्रतिभोत्पत्तिहेतुर्विरोधः ॥ नह्यनन्तार्थद्वयप्रतिपादकशब्दश्ले
षः द्वितीयार्थस्य प्रतिभानमात्रस्य परोहाभावात्तान्त च विरोधाभासवद्विरोधः श्लेषाभास इव श्लेषः तस्मादेवमादि
षु वाक्येषु श्लेषप्रतिभोत्पत्तिहेतुरलंकारान्तरमेव । तथा च सहृदयशिरश्चिन्तामणिः ॥ नाल्पः कविरिव स्वल्पश्लोको देवमहान्त
वान् ॥ इति ॥ अनुरागवती संध्या दिवसस्तत्पुरःसरः अहो दैवगतिश्चित्रा तथापि न समागमः ॥ आहायचापमचलं कृतवा
होनं गुणो विषमदृष्टिः ॥ यश्चिन्नमच्युतशरो लक्ष्यमभांक्ष्य मंभोसीनन्तमनस्मोऽइत्यादावेकदेशविवर्तिरूपकश्लेष

घतितरे कस्मात्सोक्तिविरोधित्वमुचितं। शब्दश्लेष इति चोच्यते। अर्थालंकारमध्ये तु स्पष्ट इति कोऽयं नयः॥ किं च वैचित्र्यम
लंकार इति य एव कविप्रतिभासंरंभगोचरस्तत्रैव विचित्रतेति सैवालंकारभूमिः॥ अर्थमुखप्रेक्षित्वमेतेषां शब्दानामिति चेत्॥
अनुप्रासादीनामपि तथैवेति तेऽप्यर्थालंकाराः॥ किं नो व्यक्त इति रसादिव्यंजकस्वरूपवाच्यविशेषसव्यपेक्षत्वेऽप्यनुप्रा
सादीनामलंकारता॥ शब्दगुणदोषाणामप्यर्थापेक्षयैव गुणदोषता॥ अर्थगुणदोषालंकाराणां शब्दापेक्षयाव स्थि
तिरिति तेऽपि शब्दगतत्वेनैवोच्यन्ता॥ विधौ वक्त्रेमरुद्दीयाहे वर्णादिश्लेषेऽर्थक्रमप्रत्ययच्छायत्वेऽर्थश्लेषत्वं शब्दभेदेऽपि
प्रसज्यत इति सैव सोऽहि स्वयं विचार्य्यमा। तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता॥ सति वैशविशेषेण यत्रत्य स्मावर्णा
ः खड्गमुरजपद्माद्याकारमुल्लासयन्ति तच्चित्रं काव्यम्॥ कष्टं काव्यमेतदिति मात्रं प्रदर्श्यते उदाहरणं॥ मारारिशक्र
रामेभमुखैरासाररंहसा॥ सारारब्धस्तवा नित्यं तदर्त्तिहरणक्षमा॥ माता नतानां संघट्टः श्रियां बाधितसंभ्रमा॥
मान्याथ सीमा रामाणां शं मे दिश्यादुमादिजा॥ खड्गबंधः॥ सरला बहलारंभतरलालिबलारवा॥ वारला बहुलामंदकरला बहु
मला मुरजबंधः॥ भास्वत्प्रतिभासारसा भाता हता विभा॥ भावितात्मा शुभा वादे देवाभा बत ते सभा॥ पद्मं॥ रसासार रसासार
सायताक्षक्षतायासा सातावाततवातता सा रक्षतस्त्वस्त्वतक्षर॥ सर्वतोभद्रः॥ संभविनोऽप्यन्ये प्रभेदाः शक्तिमात्रप्रकाश
काः॥ ननु काव्यरूपतां दधतीति न दर्श्यन्ते॥ पुनरुक्तवदाभासो विभिन्नाकारशब्दगा॥ एकार्थतेव॥ भिन्नरूपसा

र्थीकानर्थकशब्दनिष्ठमेकार्थत्वेनैवमुखेभासनं पुनरुक्तवदाभासः ॥ सच शब्दस्य सभंगाभंगरूपकेवलशब्दनिष्ठः ॥ उदाहर
णं ॥ अरिवधदेहशरीरः सहसा रथिसूततुरगपादातः ॥ भाति सदानत्यागः स्थिरतायामवनितलतिलकः ॥ चकासत्यंग
नाऽऽमाः कौतुकानंददहेतवः ॥ तस्य राज्ञः सुमनसो विबुधाः पार्श्ववर्तिनः ॥ तथा शब्दार्थयोरयम् ॥ तनुवपुरजघन्योऽसौ
करिकुंजररुधिररक्तखरनखरः ॥ तेजोधाममहः पृथुमनसामिन्द्रो हरिर्जिष्णुः ॥ अत्रैकस्मिन्पदे परिवर्तिते नालंकार इति शब्दा
श्रयोऽपरस्मिंस्तु परिवर्तितेऽपि न हीयत इति अर्थनिष्ठ इत्युभयालंकारोऽयम् ॥ ॥ इति काव्यप्रकाशे शब्दालंकारनिर्णयो ना
म नवम उल्लासः ॥ ॥ अथार्थालंकारानाह ॥ साधर्म्यमुपमा भेदे ॥ उपमानोपमेययोरेव न तु कार्यकारणादिकयोः साधर्म्यं भवतीति त
योरेव समानेन धर्मेण संबंध उपमा ॥ भेदग्रहणमनन्वयव्यवच्छेदाय ॥ पूर्णा लुप्ता च ॥ उपमानोपमेयसाधारणधर्मोपमाप्र
तिपादकानामुपादाने पूर्णा ॥ एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता ॥ सा ॥ साऽग्रिमा ॥ श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा ॥
अग्रिमा पूर्णा ॥ यथेववाशब्दा यत्परास्तस्यैवोपमानताप्रतीतिरिति यद्यप्युपमानविशेषणान्येते तथापि शब्द
शक्तिमहिम्ना श्रुत्यैव षष्ठीवत्संबंधं प्रतिपादयंतीति तत्सद्भावे श्रौत्युपमा ॥ तथैव तत्र तस्येवेत्यनेनेवार्थे विहितस्य वते
रुपादाने तेन तुल्यमित्यादावुपमेय एव तत्तुल्यमस्येत्यादौ चोपमान एव ॥ इदं च तच्च तुल्यमित्युभयत्रापि तुल्यादिशब्दा
नां विश्रान्तिरिति साम्यपर्यालोचनया तुल्यताप्रतीतिरिति साधर्म्यस्यार्थत्वात्तुल्यादिपदोपादाने आर्थी ॥ तद्वदेवत

का॰प्र॰ त्वमित्यादिना विहितस्य वतेः स्थितौ इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति नित्यसमासे इवशब्दप्रयोगे
६१ समासगा॥ क्रमेणोदाहरणानि। खमैपि समरेषु त्वां। विजयश्रीर्न मुंचति प्रभावप्रभवं कांतं स्वाधीनपतिका यथा॥ चकि
61 तहरिणलोललोचनायाः क्रुधितरुणारुणतारहारिकान्ति। सरसिजमिदमाननं च तस्याः सममिति चेतसि सम्मदं वि
धत्ते॥ अत्यायतैर्नियमकारिभिरुद्धतानां दिव्यैः प्रभाभिरनपायमयैरुपायैः। शौरिर्भुजैरिव चतुर्भिरदः सदा यो लक्ष्मीवि
लासभवनैर्भुवनं बभार॥ अवितथमनोरथपथप्रथनेषु प्रगुणगरिमगीतश्रीः। सुरतरुसदृशः स भवानभिलषणीयः क्षि
तीश्वर न कस्य॥ गाम्भीर्यगरिमा तस्य सत्यं गंगाभुजंगवत्। दुरालोकः स समरे निदाघाम्बररत्नवत्॥ स्वाधीनभर्तृका कान्तं भजमाना
यथालोकोत्तरचमत्कारमत्र तथा जयश्रीस्त्वहासे च नेनेत्यादिना प्रतीयमानेन विना। यद्यपि नोक्तेर्वैचित्र्यं वैचित्र्यं चालंकारस्त
थापि न ध्यानगुणीभूतव्यंग्यव्यवहारः॥ न खलु व्यंग्यसंस्पर्शपरामर्शादत्र चारुताप्रतीतिरपि तु वाच्यवैचित्र्यप्र
तिभासादेव। रसादिरूपव्यंग्यार्थोपस्कारान्तरं च सर्वत्राव्यभिचारी तथापि स्वैवतदलंकारोदाहरणता॥ तद्रहितत्वेन
तूदाह्रियमाणा विरसतामावहंतीति। एवं च पूर्वापरविरुद्धाभिधानमिति न चोदनीयम्॥ तद्धर्मस्य लोपे स्यान्नश्रौ
तीतद्धिते पुनः॥ धर्मः साधारणः तद्धिते पुनः॥ धर्मः साधारणः तद्धिते कल्पबादौ तार्थ्ये वा॥ तेन पंच उदाहरणा राम॰
नि॥ धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः॥ करणीयं वचश्चेतः सत्यं तस्यामृतं यथा॥ आकृष्टकरवालोऽसौ सं ६१

परापे परिभ्रमन्॥प्रसर्पिसेनयाद्यः क्रान्तेन समं प्रभुः॥करवाल इवाचारस्तस्य वागमृतोपमा॥विषकल्पं मनो वे
त्सि यदि जीवसि तत्सखे॥उपमानानुपादाने वाक्यगाथ समासगा॥सअलकरणपरवीसामसिरिविअरणं ण सरसकव
स्स।दीसइ अह व।णिसम्मइ सरिसं अंसंसमेत्तेन॥कव्वस्सेत्यत्र कव्वसममित्ति सरिसमित्यत्र तस्य गतमिति पाठे एषैव समासगा॥
वादेर्लोपे समासे सा कर्माधारक्यचि क्यङि कर्मकर्त्रोर्णमुलि।वाद्यलुप् उपमाद्योतक इति वादेः उपमाप्रतिपादकस्य।चलो
पे पदद्वे कर्मण्यधिकरणे चोत्पन्ने क्यचि कर्तरि क्यङि च कर्मकर्त्रोरुपपदयोर्णमुलि च भवेत्॥उदाहरणानि।ततः कुमुदना
थेन कामिनीगण्डपाण्डुना॥नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलंकृता॥तथा।असितभुजगभीषणासिपत्रो रुहरुहिकाहितचित्ततूर्ण
चारः॥पुलकिततनुरुत्कपोलकान्तिः प्रतिभटविक्रमदर्शनेयमासीत्॥पौरं सुतीयति जनं समरान्तरेवन्तःपुरीयति विचि
त्रचरितं बुधः॥नारीयति समरसीम्नि कृपाणपाणेरालोक्यस्य चरितानि सपत्नसेना॥मृधे निदाघघर्मांशुदर्शं पश्यन्ति तं परे स्वपु
नः॥पार्थसंचारं संचरत्यवनीपतिः॥एतद्विलोपे क्विप्समासगा॥एतयोर्द्वयोर्द्वयोर्धर्मवाद्योः॥उदाहरणं।सविता वि
धवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः॥यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि।परिपन्थिमनोरा
ज्यशतैरपि दुराक्रमः॥संपरायप्रवृत्तोसौ राजते राजकुञ्जरः॥धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते॥ढुंढुंणन्तो मरीहि
सि कंटअकलिआइं केअइवणाइं मालइकुसुमपरिच्छं भमर भमन्तो ण पाविहिसि॥कुसुमेन सममिति पाठे वाक्यगा॥धर्मवि

का.प्र. वाधुपेमेयासे ॥ आसोनिरासष्ठ ॥ उदाहरणं । आराति विक्रमालोकविकस्वरविलोचनः ॥ कृपाणोदग्रदोर्दंडः स सहस्रायुधी
६२ यति । अत्रीत्मा उपमेय ॥ त्रिलोपे च समासगा ॥ त्रयाणां वा इवधर्मोपमानानां ॥ तरुणिमनिकृतावलोकनाल्ललितविलास सवि
62 लब्धविग्रहा स्मरशरविसराचितांतरा मृगनयना हरते मुनेर्मनः ॥ अत्र सह उपमानेत्यादिनायहा समासलोपौ । क्रूरस्याचारस्या
यः ॥ स्मलतपाद्यवसानाह यः ॥ स्मलेनान्विछत्यायः ॥ स्मलिकइत्यतिशापो । किंनत्रि क्रूरा वारोपमेयते स्पधर्मैवारीनांलो
पे त्रिलोपे त्रिलोपे च उपमा । एवमेकोनविंशतिर्लुप्ताः ॥ पूर्णाभिः सह पंचविंशतिः ॥ अनयैनैव राज्यश्रीर्दैन्येनैव मनस्विता ॥ म
म्लौ साथ विषादेन पद्मिनीव हिमाम्भसे त्यभिन्ने साधारणधर्मे ज्योत्स्नेव नयनानंदः सुरेव मदकारणं प्रभुतेव समाकृष्टसर्वलो
कानितंबिनी ॥ इति भिन्ने वा तस्मिन्नेकस्यैव बहूपमानोपादाने मालोपमा ॥ यथोत्तरमुपमेयस्योपमानत्वे पूर्ववदभिन्नभिन्न
धर्मत्वो रशनावत्कनकवितरराजलत्वमतकेरनरेगितार्थितंते ॥ मतिरिव मूर्तिर्मधुरा मूर्तिरिव सभा प्रभावचिता । तस्याः सभेव जयश्री
ला ॥ मतिरिव मूर्तिर्मधुरा मूर्तिरिव सभा प्रभावचिता ॥ तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न परेषाम् इत्यादि रसनो
पमा वचनलक्षिता ॥ एवं विधैर्विश्वसहस्रसंभवाद्भेदा नात्र क्रमा च्च ॥ उपमानोपमेयत्वे एकस्यैवैकवाक्यगो अनन्वयः ॥
उपमानांतरसंबंधाभावोऽनन्वयः ॥ न केवलं भाति नितांतकांतिर्नितम्बिनी सैव नितम्बिनीव ॥ यावद्विलासायुधलाव
लासा स्तोत द्विलासा इव तद्विलासाः ॥ विपर्यास उपमेयोपमानयोः ॥ तयोरुपमानोपमेययोः परिवृत्तिरर्थाद्वाक्यद्वये ॥ इ

तरोपमानस्य च छेदः परोऽपमेये नोपमेयोपमा ॥ उदाहरणं । कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः ॥ धरणी
वधृतिर्धृतिरिव धरणी सततं विभाति बत यस्य ॥ संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ॥ समेनोपमानेन । उन्मेषं यो म
मन सहते जातिवैरी निशायामिन्दोरिन्दीवरदलदृशा तस्य सौंदर्यदर्पः ॥ नीतः शांतिं प्रसभमनया वक्त्रकांत्येति हर्षाल्ल
ग्ना मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः ॥ लिम्पतीव तमोऽङ्गानि वर्षतीवांजनं नभः ॥ इत्यादौ व्यापनादि लेपनादिरूपतया संभावितं
ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः ॥ भेदोक्तौ यथा । अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः कृशानुः किं सर्वाः प्रसर
ति दिशो नैष नियतं कृतांतः किं साक्षान्महिषवहनोऽसाविति चिरं समालोक्याजौ त्वां विदधति विकल्पान्प्रतिभटाः ॥ भेदोक्ता
वित्यनेन केवलमत्र निश्चयगर्भो यावन्निश्चयान्तोऽपि संदेहः स्वीकृतः ॥ यथा इन्दुः किं क्व कलंकः सरसिजमेतत्किमंबु कुत्र गतम् ॥ ल
लितसविलासवचनैर्मुखमिति हरिणाक्षि निश्चितं परतः ॥ किन्तु निश्चयगर्भ इव नात्र निश्चयः प्रतीयमान इत्यये स्थितो भ
दोऽस्त्येन ॥ तदनुक्तौ यथा । अस्याः सर्गविधौ प्रजापतिरभूच्चंद्रो नु कान्तिप्रदः शृंगारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ॥ वे
दाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥ तद्रूपकमभेदो य उपमेयउ
पमानोपमेययोः ॥ अतिसाम्यादनपह्नुतभेदयोरभेदः ॥ समस्तवस्तुविषयं श्रौता आरोपिता यदा ॥ आरोपविषया इवारोप्य
माणा यदा शब्दोपात्तास्तदा समस्तानि वस्तूनि विषयोऽस्येति समस्तवस्तुविषयं आरोपिता इति बहुवचनमविवक्षितं ॥ यथा ज्यो

का॰प्र॰ त्स्नाभस्मच्छुरणधवलाबिभ्रतीतारकास्थीन्यन्तर्द्धानव्यसनरसिकारात्रिकापालिकीयं॥ द्वीपाद्द्वीपंभ्रमतिदधतीचंद्रमुद्राकपाले
६३ न्यस्तंसिद्धाञ्जनपरिमलंलांछनस्यच्छलेन॥ अत्रपादत्रये अन्तर्द्धानव्यसनरसिकत्वमारोपितधर्मएवेतिरूपकपरिग्रहेसाधक
63 मस्ति। तत्संकराशंकानकार्या॥ श्रौताआर्थाश्चतेयस्मिन्नेकदेशविवर्त्तितत्॥ केचिदारोप्यमाणाः॰॥ शब्दोपात्ताः॰ केचिदर्थसाम
र्थ्यादवसेयाइत्येकदेशविवर्त्ति। यथा। जस्सरणंतेउरएकरेकुणंतस्समंडलग्गलअं। रससंमुहीविसहसापरंमुहीहोइरि
उसेणा॥ अत्ररणस्यान्तः॰पुरत्वमारोप्यमाणंशब्दोपात्तंमंडलाग्रलतायानायिकात्वंरिपुसेनायाश्चप्रतिनायिकात्वमर्थसाम
र्थ्यादवसीयतइत्येकदेशेविशेषेणवर्त्तनादेकदेशविवर्त्ति। सांगमेतत्॥ उक्तद्विभेदंसावयवं। निरंगंतुशुद्धंयथा। कुरंगीवांगानिस्ति
मितयतिगीतध्वनिषुयत्सखींकान्तोदन्तंश्रुतमपिपुनः॰प्रश्नयतियत्॥ अनिद्रंयच्चान्तः॰स्वपितितदहोवेद्म्यभिनवांप्रवृत्तोस्याः
सेक्तुंहृदिमनसिजप्रेमलतिकां। मालातुपूर्ववत्॥ मालोपमायामिवैकस्मिन्बहवआरोपिताः॰॥ यथा। सौन्दर्यस्यतरंगिणीत
रुणिमोत्कर्षस्यहर्षोद्गमः॰कान्तेः॰ कार्मणकर्मनर्मरहसामुल्लासनावासभूः॰। विद्यावक्रगिरांविधेरनवधिप्रावीण्यसाक्षात्क्रियाबा
णाः॰पंचशिलीमुखस्यललनाचूडामणिः॰साप्रिया॥ नियतारोपणोपायः॰स्यादारोपः॰परस्ययः॰॥ तत्परंपरितंश्लिष्टेवाचके
भेदभाजिवा॥ यथा। विद्वन्मानसहंसवैरिकमलासंकोचदीप्तद्युतेदुर्गामार्गणनीललोहितसमित्स्वीकारवैश्वानरसत्यप्रीतिविधा रम॰
नदक्षविजयप्राग्भावभीमप्रभोसाम्राज्यंवरवीरवत्सरशतंवैरिंचमुच्चैः॰क्रियाः॰॥ अत्रमानसमेवमानसंकमलायाः॰संकोचएव ६३

वक्रमल्लानामासंकोचो दुर्गाणाममार्गाणामेव दुर्गाणामार्गणां समितं। स्वीकार एव समिश्रो स्वीकारः॥ सत्ये प्रीतिरेव वस
त्या मम प्रीतिः॥ ४॥ विजयः परपराभव एव विजयोर्जनः॥ एवमारोपणानिमित्तो हेत्वाहेरारोपः॥ यद्यपि शब्दार्थालंकारोघ मिश्र त्रो
वक्ष्यते चान्यथापि प्रसिद्ध्यनुरोधादत्रोक्तः॥ एकदेशविवर्तीद मन्ये रूपमभिधीयते। मेदमाजियथा॥ आलानं जयकुंजरस्य दृषदां से
तुर्विपद्वारिधेः पूर्वाद्रिः करवालचंडमहसो लीलोपधानं श्रियः॥ संग्रामामृतसागरप्रमथनक्रीडाविधौ मंदरो नो जयराज
ति वीरवैरिवनितावैधव्यदस्ते भुजः॥ अत्र जयादेर्भिन्नशब्दवाच्यस्य कुंजरत्वाद्यारोपे भुजस्यालानत्वाद्यारोपो युज्यते। अलौ
किकमहालोकप्रकाशितजगत्त्रयाः स्तूयते देव सद्वंशमुक्तारत्नेन कैर्भवान॥ निरवधि निराश्रयं च परस्य स्थितमनिवर्तितकौत
कप्रपंचं॥ प्रथमसुंदरमवान्नपकूर्मम त्रिर्जयति चतुर्दशलोकवल्लिकंद इति चामालारूपकमपि परंपरितं द्रष्टव्यं॥ किसलयक
रैर्लतानां करकमलैः कामिनां मनो जयति॥ नलिनीनां कमलमुखैर्मुखेंदुभिर्योषितां॥ मदनदुत्याहोरसनारूपकं नवैचित्र्य
वहितिनलक्षितं॥ प्रकृतमन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः॥ उपमेयमसत्यं कृत्वोपमानं सत्यतया यत् स्थाप्यते सा त्वपह्
नुतिः॥ उदाहरणं। अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये कलंको नैवायं विलसति शशांकस्य वपुषि। अमुष्येयं मन्ये वि
गलदमृतस्यंदशिशिरे रतिश्रांता शेते रजनिरमणी गाढमुरसि॥ अथवा। वतंसखिकिपर्दे तनुरस्य यद्वैरं स्मरस्यापि प्रियविरह

का॰प्र॰ क्रुष्णोऽस्मिन्नागिलोके। तथा हि। उपवनसहकारेऽस्मासि संगच्छलेन प्रतिविशिखमनेनोहं कितंकालकूटं॥ अत्र न समं गाणि सह
६९ काराणांपपितु सकालकूटं ४ इत्यादु तिमन्तोतिषु॥ एवं वा। अमुष्मिंल्लावण्यामृतसरसि नूनं मृगदृशः ४ स्मरः ४ शर्वप्लुष्टः ४ पृथुजघ
64 नभागे निपतितः ४॥ यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे शिखा धूमस्येयं परिणमति रोमावलिवपुः ४॥ अत्र न रोमालिर्धू
मशिखेयमिति प्राप्ति ४। एवमियमन्यं तत्रेरप्य त्याः। श्लेषः स वाक्ये एकस्मिन्यत्रानेकार्थता भवेत्॥ एकार्थप्रतिपादिकानां
मेव शब्दानां यत्रानेकोऽर्थः ४ स श्लेषः ४॥ उदयमयते दिङ्मालिन्यं निराकुरुतेतरां नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः ४॥
रचयतितरां स्वैराचारप्रवर्तनकर्तनं बत बत लसत्तेजः ४ पुञ्जो विभाति विभाकरः ४॥ अत्राभिधाया अनियन्त्रणाद् द्वावप्यर्कभूपौ
वाच्यौ॥ परोक्तिर्भेदकैः ४ श्लिष्टैः ४ समासोक्तिः ४ प्रकृतार्थप्रतिपादकेन वाक्येन श्लिष्टविशेषणमाहात्म्यान्न तु विशेष्यस्य सामर्थ्या
दपि यदप्रकृतस्याप्यर्थस्याभिधानं समासेन संक्षेपेणार्थद्वयकथनात्सा समासोक्तिः ४॥ उदाहरणं। लहिऊण तुज्झ बाहुप्फंसं
जीए स को वि उल्लासो जअलच्छी तुह विरहे ण हु उज्जला दुब्बला णं सा। अत्र जयलक्ष्मीशब्दस्य केवलकान्तावाचकत्वं नास्ति॥ निद
र्शना। अभवन्वस्तुसंबन्ध उपमापरिकल्पकः ४॥ निदर्शनं दृष्टान्तकरणं। उदाहरणं। क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः॥ ति
तीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरं॥ अत्रोडुपेन सागरतरणमिव मन्मत्या सूर्यवंशवर्णनमित्युपमायां पर्यवस्यति॥ यथा॥ उदय राम॰
ति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तं। वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्॥ अत्र ६४

कथमन्यस्य लीलामान्यो वहतीत्युपमायां पर्यवसानं ॥ दोर्भ्यामिति तितीर्षति । तरंगवतो भुजंगमाद्भातुमिच्छति करेह रिणाङ्कबिम्ब ।
मेत्रेल्लिलंघयिषति धिक्त्वमेषहे वपलेगुणानां । इति मुग्धमाह धातिइत्यादौ मालान याप्येयाइष्टव्या ॥ स्वस्वहेत्वन्वयस्योक्तिः
क्रियपयेव हि सापरा । क्रियये व स्वस्वरूपस्य करणाद्योः संबंधोपह्वगम्यते ॥ सापरा निदर्शना ॥ उन्नतं पदमुपैति यो लघुर्हे
लयैव स पतेदिति ब्रुवन् शैलशेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः ॥ अत्र पातक्रियया पतनस्य लाघवे सत्युन्नत
पदप्राप्तिरूपस्य कारणस्य च संबंधः ख्याप्यते । अप्रस्तुतप्रशंसा या या प्रसेव प्रस्तुताश्रया । अप्राकरणिकस्यार्थस्याभिधा
नेन प्राकरणिकस्याक्षेपोऽप्रस्तुतप्रशंसा ॥ सा च कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति । तदन्यस्य वचस्तुल्ये तुल्यस्ये
वेति पंचधा ॥ तदन्यस्य कारणादेः क्रमेणोदाहरणम् ॥ याताः किं न मिलंति सुंदरि पुनश्चिंता त्वया मत्कृते नो कार्या
नितरां कृशासि कथयत्येवं सबाष्पे मयि । लज्जामंथरतारकेण निपतत्पीताश्रुणा चक्षुषा दृष्ट्वा मां हसितेन भाविमरणो
त्साहस्तया सूचितः ॥ अत्र प्रस्थानात्किमिति निवृत्तोसीति कार्ये पृष्टे कारणमभिहितं । राजन् राजसुता न पाठयति मां देव्यो
पि तूष्णीं स्थिताः कुब्जे भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते इत्थं नाथ शुकस्तवारिभवने मुक्तोऽध्वगैः पंजराच्चित्रस्था
नवलोक्य शून्यवलभावेकैकमाभाषते अत्र प्रस्थानोद्यतं भवंतं ज्ञात्वा सहसैव त्वद्रिपवः ॥ पलाय्य गता इति कारणे प्रस्तुते
नेकार्यमुक्तम् ॥ एतत्तस्य मुखात्कियत्कमलिनीपत्रे कणं वारिणो यन्मुक्तामणिरित्यमंस्त स जडः ॥ शृणवन्यदस्मादपि ॥ अ

का०प्र० ६५ 65 गुल्मल्लघुल्मकपाप्रविलल्लयिन्यादीयमाने शनै० कुञ्जोद्देशमुपगतो ममेत्यनुदिनं तिष्ठति नान्त० श्रुचा॥ अत्रास्थाने जडानां
महती संभावभवतीति सामान्ये प्रस्तुते विशेष० कथित०॥ सुहृद्धस्त बाष्पजलप्रमार्जनं करोति वैरप्रतियातेनेनय०॥ सए
वप ज्ञ० मधुमानस्तनोति मानस्तजीवितं तस्य समाजनं प्रिय०॥ अत्र कार्यं तिष्ठत्यनरकानुखचक्रे नायदृष्टु० खंडमयति। अ
हालमेव श्लाघ्यदृति विशेषे प्रकृते सामान्यमुदितं। तुल्ये प्रस्तुते तुल्याभिधाने त्रय० प्रकार०॥ श्लेष० समासोक्तिः सा
दृश्यमात्रं च तुल्यान्तरस्यापेक्षहेतु०॥ क्रमेणोदाहरणं। पुंस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि यायाद्यदि प्रणयने न महा
नपि स्यात्॥ अभ्युद्धरेत्तदपि विश्वमितीदृशीयं केनापि दिक्प्रकटिता पुरुषोत्तमेन नायेनास्य मुद्रितेन वशा। मितं०
कौतिरेवौतत्त्वते युज्ये तप्रतिकर्तुमेवन भुनस्त्वस्येव पादह्यह०॥ स्वीतोनेतदृनुद्धितं पदितत्तः किं त्वं जुसे तो मतागस्ते वंगस्तु धा
मतानुभवतो यज्ञोऽस्मि दिस्फूर्जसे॥ आह्वायवारिपरित० सारितांमुखे भ्यः किंतावदर्जितमनेन दुरोदरेण। सारीकृतं चतुरङ
वाहृह नेहृतं चयाताल कुक्षिविवरे विवेशितेच॥ इयं च काचिदुत्प्रेक्ष्यतोपमानाद्यानिध्यानेये रीणैव भवति यथा॥ अबेरण० स्थ
गितभुवनाभोगापातालकुक्षे० पोतोपापाद्यहृदिवहवोलं घते पिक्रमते॥ आहोतिरिक्त० कथमपि भवेदोषदैवान्तहर
नीको नामस्याद्वटकुहाराणलोके नेप्यस्यः॥ कश्चित्तु व्याराय पेरायथा॥ कस्त्वं भो० कथयामि दैवहतकं मां विद्धि राम। ६५
ज्ञासोटकं वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते। वामेनात्र वटस्तमध्वगजन० सर्वात्मनासेवते न च्छायापि

परोपकारकरणीमार्गस्थितस्यास्मिन्नो क्वचित्त्वेनाध्यारोपेण यथा॥ सोऽपूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं दृष्टिः
सा मदविस्मृतस्वपरदिक्किं भूयसोक्तेन वा॥ सर्वं विस्मृतवानसि भ्रमर हे यद्वारणोऽद्याप्यसावन्तःशून्यकरो निषेव्यत इ
ति भ्रातः क एष ग्रहः॥ अत्र रसनाविपर्यासः अन्यत्वकर्णचम्भ्रमरस्यासेवने हेतुः करणचापलं च हेतुः॥ मदः प्रत्युत ते
त्सेवने निमित्तम्॥ निगीर्याध्यवसानं च प्रकृतस्य परेण यत्॥ प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनं॥ कार्यकारणयोर्य
श्च यो वा पौर्वापर्यविपर्ययः॥ विज्ञेयातिशयोक्तिः सा॥ उपमानेनान्तर्निगीर्णस्योपमेयस्य यदध्यवसानं सैका॥ यथा॥ कम
लमनम्भसि कमले च कुवलये तानि कनकलतिकायां॥ सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम्॥ अत्र मुखादि कमला
दिरूपतयाध्यवसितम्॥ प्रस्तुतस्यैवान्यत्वेन नाध्यवसीयते सापरा॥ यथा॥ अण्णं लडहत्तणअं अण्णा विअ का वि वत्तणच्छाआ
सामा सामण्णपआवइणो रेह व्विअ ण होइ॥ यद्यर्थस्य यदि शब्देन चेच्छब्देन वा कथने यत्कल्पनमर्थादसम्भविनोऽर्थस्य सा तृ
तीया॥ यथा॥ राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः॥ तस्या मुखं तदा साम्यपराभवमवाप्नुयात्॥ कारणस्य शीघ्रकारितां वक्तुं
कार्यस्य पूर्वमुक्तौ चतुर्थी॥ यथा॥ हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन॥ चरमं रमणीवल्लभ लोचनविषयं
त्वया भजता॥ प्रतिवस्तूपमा तु सा॥ सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः॥ साम्यं साधारणो धर्मः॥ उपमेय
वाक्ये चोपमानवाक्ये च॥ कथितपदस्य दुष्टतया अभिहितत्वाच्छब्दभेदेन तदुपादीयते। सा वस्तुनो वाक्यस्योपमानत्वा

का॰ प्र॰ स्मातिवस्तूपमा॥ यथा॥ देवीभावं गमिता परिवारपदं कथं भजत्येषा॥ न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नं॥ यदि दहत्यनलो
६६ त्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः॥ लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता॥ इत्यादिमालाप्रतिवस्तूप
66 माप्युदाहार्या॥ एवमन्यत्राप्यनुसर्तव्या। दृष्टान्तः पुनरेतेषां प्रतिबिम्बनम्॥ एतेषां साधारणधर्मादीनां। दृष्टोन्तो निश्चयो यत्र स
दृष्टान्तः॥ यथा त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितं॥ आलोके हि हिमांशोर्विकसति कुसुमं कुमुद्वत्याः॥ एष सा
धर्म्येण। वैधर्म्येणातु॥ तवाहवे साहसकर्मशर्मणः करं कृपाणान्तिकमानिनीषतः॥ भटाः परेषां विशरारु
तामगुर्दधत्यवाते स्थिरतां हि पांसवः॥ सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनां॥ सैव क्रियासु बहुषु कारकस्येति दीप
कम्॥ प्राकरणिकाप्राकरणिकानामर्थानां दुपमानोपमेयानां धर्मः क्रियादिरेकवारमेव यदुपादीयते। तदेक
स्थस्यैव समस्तवाक्यदीपनाद्दीपकम्। यथा॥ किविणाण धणं णाआण फणमणी केसराइं सीहाणं॥ कुलवालिआ
णं थणआ कुत्तो छिप्पंति अमुआणं॥ कारकस्य च बहुषु क्रियासु सकृद्वृत्तिर्दीपकम्॥ यथा॥ स्विद्यति कूणति वेल्लति
विवलति निमिषति विलोकयति तिर्यक्॥ अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणया वधूः शयने॥ मालादीपकमाद्यं
चेद्यथोत्तरगुणावहम्॥ पूर्वेण पूर्वेण वस्तुनोत्तरमुत्तरं चेदुपक्रियते तन्मालादीपकम्॥ तद्यथा॥ संग्रामाङ्गणमा राम॰
गतेन भवता चापे समारोपिते संप्रासेया रिं वंधिपोधनि वहेसोमुरव्यमासादितं॥ कोदण्डेन शराः शरैररिशिरस्तेनापि भू ६६

मंडलं तेन खन्यजेत्वयामितयशसेनापि लोकत्रयम्॥ नियतानां सकृदुक्तिः सा पुनरुक्तत्वपोषिता॥ निमतानां प्राकरणिकानाम
प्राकरणिकानामेव वा॥ क्रमेणोदाहरणं॥ पांडुक्षामं वहनं हृदयं सरसं तवालसं च वपुः॥ आवेदयति नितान्तं क्षत्रियरोगं स
खि हृदंतः॥ कुमुदकमलनीलनीरजालिर्ललितविलासजुषोर्दृशोः पुरः॥ अस्तमस्तनरशिमरं जन्मप्रतिहतमेकपदे तवा
ननस्य॥ उपमानाद्यदन्यस्य व्यतिरेकः स एव सः॥ अन्यस्योपमेयस्य व्यतिरेक आधिक्यं। क्षीणः क्षीणोपि शशी भूयोभूयोपि वर्द्धते
सत्यं॥ विरम प्रसीद सुंदरि यौवनमतिवर्त्ति यातं तु॥ इत्यादावुपमानस्योपमेयादाधिक्यमिति केचिदुक्तं॥ तदयुक्तं। अ
त्रयोर्वनगतास्थैर्यस्याधिक्यं विवक्षितं हेलौ उक्तावेतत्कीनां त्रये साम्यं निवेदितौ शब्दार्थाभ्यामथाक्षिप्ते श्लेषेण द्विरुक्तता।
व्यतिरेकस्य हेतुरुपमेयगतमुत्कर्षनिमित्तमुपमानगतं निकर्षकारणं। तयोर्द्वयोरुक्तिरेकतरस्य द्वयोर्वानुक्तिरित्यनुक्तित्रयं
।एतस्मिंश्च चतुष्टयमुपमानोपमेयभावे शब्देन प्रतिपादिते। अर्थेन च क्रमेणोक्तौ चत्वार एव भेदाः॥ आक्षिप्ते चौपम्ये तावन्त एव
द्वादश एते च श्लेषेपि भवन्तीति चतुर्विंशतिभेदाः॥ क्रमेणोदाहरणं॥ असिमात्रसहायस्य प्रभूतारिपराभवे। अन्यतुच्छजनस्ये
वनस्याप्यस्य महाधृतेः॥ अत्रैव तुच्छेति महाधृतेरित्यनयोः पर्यायेणायुगपद्वानुपादानेन भेदत्रयम्॥ एवमन्येष्वपि द्रष्टव्यं॥ अत्र
च शब्दस्य सम्भावाच्छाब्दमौपम्यं॥ अत्रैवासिमात्रसहायोऽयं प्रभूतारिपराभवे। नैवान्यतुच्छजनवत्सगर्वोऽयं धृतेर्निधिः॥ तुल्यार्थेन
वतिरित्यार्थमौपम्यं॥ इयेस्तु नयानादासीत् कृततामरसश्रियाः॥ आननेनाकलंकेन जयतीन्दुं कलंकिनं॥ अत्रैवाहितुल्यादि

पद्मिविरहेस्याक्षिप्तोपमाजितेंद्रियतया साम्यविधावद्भुनिषेविमा४। आतिगा४ गुणास्यास्यनाज्जवसरं गुणागुणा४॥ अत्रेवार्थेवति४। गुणा
शाद्व४श्लिष्ट४। अखंडमंडल४ श्रीमान्यश्यैष पार्थिवीयति४। न निशाकरवज्जातु कालावैकल्यमागत४। अत्र तुल्यार्थेवति४॥ क
लाशाद्व४श्लिष्ट४। मालाप्रतियस्तु पमावन्मालाव्यतिरेकोपि संभावितस्तस्यापि भेदा एवमस्त्याः। आद्यिमात्रं चोदाहियते। यथा। ह
रवल्लविपद्मपिहरिवन्नविमोविभ तविततवपु४ रविवन्नवापि दुः सहकरतापितभू४ कदाचिदसि। अत्र तुल्यार्थेवति विषमादय
श्च शब्दा४ श्लिष्टाः। नित्योदितप्रतापेन त्रियामीलिता भास्वता नेमनमः येन भास्वानेष विनिर्जित४॥ अत्राक्षिप्तैवोपमा भासते इति
श्लिष्ट४। यथा वा। स्वच्छात्मता गुणसमुल्लसितेंदुबिंबं बिंबप्रभाधरमकृत्रिममृष्टगंधं। नाम तवापि वतोरजानीमुपत्रल स्मो जहार
मधुताननमंगनानां॥ अत्रेवादे४ तुल्यादिपदानामभावेपि श्लिष्टविशेषणेनाक्षिप्तैवोपमा प्रतीयते। एवंजातीयका४ श्लिष्टोक्ति
योग्यस्य यदस्य पृथगुपादानेऽन्येपि भेदा४ संभवंति। तेप्यतयैव दिशा द्रष्टव्या४॥ निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया। वक्ष्य
माणोक्तविषयः स आक्षेपो द्विधा मत४। विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीकार्यस्याशक्यवक्तव्यत्वमतिप्रसिद्धत्वं वा वि
शेषं वक्तुं निषेध इव निषेध४ स वक्ष्यमाणविषय उक्तविषयश्चेति द्विविध आक्षेप४। क्रमेणोदाहरणं। एएहि किंपि कीएवि
कएणि। णिक्किवभणामि अलमहवा। अविआरिअकज्जारंभआरिणी मरउ णाभणिस्सं। ज्योत्स्ना मौक्तिकदाम चंदनरस४ शीतां
शुकांतद्रवः कर्पूर४ कदली मृणालवलयान्यंभोजिनीपल्लवा४॥ आंतर्मानसमास्त्वया प्रभवता तस्याः स्फुलिंगोत्करव्यापारायम

वन्तीह तत्किमनेनेन ब्रूमहे। क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना॥ हेतुरूपक्रियानिषेधेऽपि तत्फलप्रकाशनं विभावना। यथा॥ कु-
सुमितलताभिरहतापि धत्त रुजमलिकुलैरदष्टापि॥ परिवर्त्तते स्म नलिनी लहरीभिरलोलिताप्यघूर्णत सा॥ विशेषोक्तिरखण्डेषु
कारणेषु फलावचः॥ मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिः॥ अनुक्तनिमित्ता उक्तनिमित्ता। अचिन्त्यनिमित्ता च। क्र-
मेणोदाहरणं। निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारमधिष्ठितेऽपि। श्लथीकृताश्लेषरसे भुजङ्गे चचाल नालिङ्गनतोऽङ्गना सा॥ क-
र्पूर इव दग्धोऽपि शक्तिमान्यो जने जने। नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे॥ स एकस्त्रीणि जयति जगन्ति कुसुमायुधः॥ हरतापि
तनुं यस्य शम्भुना न हृतं बलं॥ यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः। यथा॥ एकस्त्रिधा वससि चेतसि चित्रमत्र देव द्विषां च
विदुषां च मृगीदृशां च। तापं च सम्मदरसं च रतिं च पुष्णन्। शौर्योष्मणा च विनयेन च लीलया च॥ सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा॥ साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण यत्समर्थ्यते। विशेषो वा सामान्येन सोऽर्थान्तर-
न्यासः॥ क्रमेणोदाहरणं। निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतं। पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम्॥
सुसितवसनालङ्कारायां कदाचन कौमुदीमहसि सुदृशि स्वैरं यान्त्यां गतेऽस्तमभूद्विधुः॥ तदनु भवतः कीर्तिः केनाप्यगीयत येन सा
प्रियगृहमगान्मुक्ताशङ्का क्व नासि शुभप्रदः॥ गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते। असंजातकिणस्कन्धः सुखं स्वपि-
ति गौर्गलिः। अहो हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशं। त एव धन्याः सुहृदः पराभवं जगत्यदृष्ट्वैव हि ये क्षयं गताः॥

का॰ प्र॰ ॥विरोधः सोविरोधोपि विरुद्धत्वेन यद्वचः॥ वस्तुवृत्तेरविरोधेपि विरुद्धयोरिव यदभिधानं स विरोधः। जातिश्चतुर्भिर्जात्याद्यैर्विरु
९८ द्धा स्याद्गुणस्त्रिभिः॥ क्रिया द्वाभ्यामपि द्रव्यं द्रव्येणैवेति ते दश॥ अभिनववनलिनीकिसलयमृणालवलयादि दवदहनराशिः॥
६५ सुभग कुरंगदृशोस्या विधिवशतस्त्वद्वियोगपविपाते॥ गिरयोप्यनुन्नतियुजो मरुदप्यचलोब्धयोप्यगम्भीराः॥ विश्वंभराप्यतिलघुर्न
रनाथ भवति के नियतं॥ येषां कण्ठपरिग्रहप्रणयितां संप्राप्य धाराधरस्तीक्ष्णः सोप्यनुरज्यते च कमपि स्नेहं पराप्नोति च॥ तेषां सं
गररंगरक्तमनसां राज्ञां त्वया भूपते पांसूनां पटलैः प्रसाधनविधिर्निर्वर्त्यते कौतुकं॥ सृजति च जगदिदमवति च जगदिदम
वति च संहरति च हेलयैव यो नियतं॥ अवसरवशतः शफरो जनार्दनः सोपि चित्रमिदं॥ सततमुसलासक्ता बहुतरगृहकर्म
घटनया नृपते द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः॥ पेशलमपि खलवचनं दहतितरां मानसं सुतत्त्ववि
दां॥ परुषमपि सुजनवाक्यं मलयजरसवत्प्रमोदयति॥ क्रौंचाद्रिरुद्दामदृषद्दृढोसौ यन्मार्गणानर्गलशातपाते॥ अभून्नवांभो
जदलाभिजातः स भार्गवः सत्यमपूर्वसर्गः॥ परिच्छेदातीतः सकलवचनानामविषयः पुनर्जन्मन्यस्मिन्ननुभवपथं यो
न गतवान्॥ विवेकप्रध्वंसादुपचितमहामोहगहनो विकारः कोप्यन्तर्जडयति च तापं च कुरुते॥ अयं वारामेको निलय इति
रत्नाकर इति श्रितोस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः॥ क एवं जानीते निजकरपुटीकोटरगतं क्षणादेनं ताम्यत्तिमि राम॰
मकरमापास्यति मुनिः॥ समदमतंगजमदजलनिस्यन्दतरंगिणीपरिष्वंगात्॥ क्षितितिलक त्वयि तटजुषि शंकरचूडा ९८

पगायि कालिन्दी॥ स्वभावोक्तिः सुडिम्भादेः स्वक्रियारूपवर्णनम्॥ स्वयोस्तदेकाश्रययोः रूपं वर्णः संस्थानं चेत्युदाहरणं॥ पश्चाद
ङ्घ्री प्रसार्य त्रिकनति विततं द्राघयित्वाङ्गमुच्चैरासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय। घासग्रासाभिलाषादनवरत
चलत्प्रोथतुण्डस्तुरंगो मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण॥ व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा।
व्याजरूपा व्याजेन वा स्तुतिः। क्रमेणोदाहरणं। हितो वामुपरोधवंध्यमनसां मन्ये न मौलिः परो लज्जानम्रतरेरा न स्मामन्युत्रसं
ह्रस्यते। यस्याङ्गं तनुतेतनश्शेमखशे तैरेत्यागतायाः श्रियः। प्राप्यत्यागकृतावसाननमापि त्वय्येव यस्याः स्थितिः हे हेला जितबोधिसत्व
वचसां किं विस्तरैस्तोयधे नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः॥ तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धापयशोभारप्रो
द्वहने करोषि कृपया साहायकं यन्मरो। भ्रातः सहोक्तिः सहार्थस्य बलादेकं द्विवाचकं। एकार्थाभिधायकं सत्सहार्थस्य बला
द्घटुभयार्थगमकं सा सहोक्तिः। यथा। सहाधिस्त्रहरिणामालिंद्रीहासंद्रासहमेगोवलं हिवाहधारागलत्त्रिउहसुहस्त्रविउ
तीत्राउद्येविरीरसह अनतनुलवाएदुघत्लाजीविहा॥ व्यापदं दिग्गते दीर्घत्वादि दीर्घत्वादि शावं द्विवसनिशागतं तु सहार्थस्या
मर्थ्यात्प्रतिपाद्यतो विनोक्तिः सो विनान्येन यन्नात्यन्तनेतरः॥ कचिदशोभनः कचिच्छोभनः। क्रमेणोदाहरणं॥
अनुचितनिशया विना शशी शशिना सापि विना महत्तमः उभयेन विना मनोभवस्फुरितं नैव चकास्ति कामिनोः। मृग
लोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः॥ अमृतद्युतिसुन्दराशयोऽयं सुहृदा तेन विना नरेन्द्रसूनुः। परिवृत्तिर्वि

का.म. निमयोर्योर्थानां स्यात्समासमैकस्थपरिवृत्तिरलंकारः॥ उदाहरणं। लतानामेतासामुदितकुसुमानां मरुदयं मितं लास्यं हत्वा प्र
६९ यति भृशमामोदमसमं मोदमसमं लतास्त्वध्न्यानामलहृदयामाहायसहसा हृदत्या। धिग्व्याधिमभिनुदितमोहव्यतिकरं
69 अत्र प्रथमेर्द्धे समेन समस्य द्वितीये उत्तमेन न्यूनस्य। नानाविधप्रहरणैर्नृप संप्रहारे स्वीकृत्य दारुणनिनादवतः प्रहारान्॥
दृप्तारिवीरविसरेण वसुंधरेयं निर्विप्रलम्भपरिरम्भविधिर्वितीर्णा॥ अत्र न्यूनेनोत्तमस्य। प्रत्यक्षा इव यद्भावाः क्रि
यन्ते भूतभाविनः। तद्भाविकं। भूताश्च भाविताश्चेति द्वन्द्वः। भावः कवेरभिप्रायोऽत्रास्तीति भाविकं। उदाहरणं। आसीदञ्ज
नमत्रेति पश्यामि तव लोचने। भाविभूषणसंभारां साक्षात्कुर्वे तवाकृतिं॥ अत्राद्येऽर्द्धे भूतस्य द्वितीये भाविनो दर्शनम्॥
काव्यलिंगं हेतोर्वाक्यपदार्थता। वाक्यार्थता यथा। वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा पुरारे न प्रायः क्वचिदपि
भवन्तं प्रणतवान्। नमन्मुक्तः संप्रत्यहमतनुरग्रेऽप्यनतिभाग्महेश क्षन्तव्यं तदिदमपराधद्वयमपि॥ अनेकपदार्थता यथा॥
प्रणयसखीसलीलपरिहासरसाधिगतैर्ललितशिरीषपुष्पहननैरपि ताम्यति यत्। वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः॥ एकपदार्थता यथा॥ भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभं हा सोपान
परम्परां गिरिसुताकान्तालयालंकृतिं। अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखालोकोच्छेदिनि मोक्षनामनि रा.म.
महामोहे निधीयामहे। एष्वपराधद्वये पूर्वापरजन्मनोरनमनं भुजपाते शस्त्रोपक्षेपः महामोहे सुखालोकोच्छेदित्वं च यथा ६९

क्रमभुक्तं तत्र रूपे च हेतुः। पर्यायोक्तं विनावाच्य वाचकत्वेन च स्थितयत्। वाच्यवाचकभावविरहितेनां जनव्यापारेणापत्याति
पादनं तस्य पर्यायेणाभंग्यन्तरेण कथनात्पर्यायोक्तो उदाहरणं यं प्रेक्ष्य विरहृ ... पि निवासमीति उज्झिता॥ महेन्द्रेण रावणमु
खमातेन दृष्टये हरे ॥ अत्र रावणशक्रो महमानमुक्तौ जाता इति व्यंग्यमपि शब्देनोच्यते। तेन प्रदेवाच्याते। तदेव व्यंग्यं
। यथा तु व्यंग्यं न तथोच्यते। यथां गादिभुक्तो चलति रघौ भोः ॥ भुक्ते खलइति विकल्पो य एव ह्येतदेव विकल्प्यपतिान
तु यथा दृष्टं तथा। एतौ भिन्नौ संसृष्टत्वेन दृष्टंभेदं संसर्गाभ्यां विकल्प्यति। उदा त्रैव सक्तन ॥ संपत्त। संपत्सम दुर्योग ॥
यथा मुक्ता ॥ केलिविस्रस्त्रहारगलिता ॥ संमार्जिनी भिर्दता ॥ प्रातः प्रांगणसीम्नि मन्थरचलद्बालांघ्रिलाक्षारु
णाः॥ हाहा दुर्मवीज श्रेकित्तधियः ॥ कर्पन्तिकेलीमुकाय द्विहस्वनेषु भोजेन्द्रपते खला गल्लोलापितम॥ मह तो चोप
लक्ष्मा उपलक्षणं भंगभावः। अर्थादुपलक्षणीये यथे उदाहरणं तद्दिक्षु नरापर्पयस्मिन्दशरथवचनानुपालनव्यसनी॥ निव
सत्वा हुसहापश्चकार रक्षः ॥ स्वयं रामः ॥ न चात्र वीरो रसस्तस्येहाङ्गत्वात्। तस्मिद्धि हेतावेकस्मिन्यत्रान्यत्तत्कारं भवेत्। स
मुच्चयोऽसौ। तस्यमस्क तस्य कार्यस्यैकस्मिन्साधके स्थिते साधकान्तराणि यत्र संभवति समुच्चयः॥ उदा
हरणं दुर्वारा ॥ स्मरमार्गणा ॥ प्रियतमो दूरे मनो त्युत्सुकं गाढं प्रेम नवं वयो ॥ निकठिना ॥ प्राणा कुलं निर्मलं॥ स्त्री
त्वं धैर्यविरोधि मन्मथसुहृत्कालः ॥ कृतान्तोऽक्षमी नो सख्यश्चतुराः कथं नु विरहः ॥ सोढव्य इत्थं शठ ॥॥ अत्र वि

का॰प्र॰ ७० 70 रहासतरले स्मरमार्गणाः ॥ कुर्वते न तु यद्यपि यमत्त इरेखिस्यादुपान्ते । एषएवसमुच्चयः ४ सद्योगेऽसद्योगे सदसद्योगे
पर्यवस्यतीति न पृथग्लक्ष्यते ॥ तथाहि । कुलममलिनं भद्रा मूर्त्तिर्मतिः ४ श्रुतशालिनी भुजबलमलं स्फीता लक्ष्मीः
प्रभुत्वमखण्डितं प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो व्रजति सुतरां दर्पं राजंस्त एव तवाङ्कुशाः ४ । अत्र सतां योगः ४ उ
त्तरोदाहरणे त्वसतां योगः ४ । शशी दिवसधूसरो गलितयौवना कामिनी सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ४ । प्रभुर्धनपरा
यणः ४ सततदुर्गतः सज्जनो नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥ अत्र शशिनि धूसरे शल्ये शल्यान्तरमिति शोभ
नयोगः ४ ॥ स त्वन्यो युगपद्या गुणक्रियाः ४ गुणौ च क्रिये च । गुणक्रिये च क्रिया ४ । क्रमेणोदाहरणानि । विदलितसक
लारि कुलं त्वद्बलमिदमभवदाशु विमलं च । प्रखलमुखानि नराधिप मलिनानि च तानि जातानि । अयमेकपदे तया वि
योगः प्रियया चोपनतः ४ सुदुः ४ सहो मे । नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः ४ ॥ कलुषं च तवाहि
तेष्वकस्मात् सितपङ्केरुहसोदररुचि चक्षुः ४ ॥ पतितं च महीपतीन्द्र तेषां वपुषि प्रस्फुरमापदां कटाक्षैः ४ ॥ धुनोति चा
सिं तनुते च कीर्तिमिति स्याद्धि ४ कृपाणपाणिश्च भवान् रणक्षितौ ससाधुवादाश्च सुराः ४ सुरालयेष्वित्यादेष्वहर्षेनाप्याक्षि
करो इत्येकस्मिन्नेशरति च नवाच्यम् । एकं क्रमेणानेकस्मिन्पर्यायः ४ ॥ एकं वस्तु क्रमेणानेकस्मिन्भवति क्रियते राम॰
वा स पर्यायः ४ । क्रमेणोदाहरणानि ॥ श्रोणीभारस्त्यजति तनुतां सेवते मध्यभागः ४ पद्भ्यां मुक्तास्तरलगतयः संश्रिता लो ७०

चनाभ्यां ॥ धत्ते चक्षुः कुचमपि वनितामद्वितीयं च वक्रं तद्गात्रारोगगात्रविनिमयः कल्पितो यौवनेन ॥ यथा वा ॥ नन्वाश्रयस्थि
तिरियं च कालकूटकेनोत्तरोत्तरविशिष्टपदेशेयाहिष्वा । प्रागगणं वस्यत्वहृदये वक्ष लक्ष्म रागाय कंठे घुना वसति वाचि पुनः खलानां
॥ यथा वा ॥ विम्बोष्ठस्वरागसेतान्निपद्घिमपद्ृपता अधुना तद्हृदयेष्वेषमगन्नावाक्षित हृदयपतो रागस्य वक्त्रनो भैहेष्येकत
याध्यवसितत्वाद्धेकत्वमविरुद्धं । तं तारामितिरिसहो अस्ररस्मरताहरणा । स्मिह अस्रमेकरसं विवाहरेपि अरागीशीवसि
अकुसुमवारोनाऽन्यस्ततोऽन्यथा अनेकमेकस्मिन् क्रमेण भवति क्रियते वा सोऽन्यः क्रमेणोदाहरणं । मधुरिमरुचिरं
वचः खलानाममृतमहो प्रथमं पृथुव्यनक्ति ॥ अथ कथकथयति मोहहेतुमन्तर्गतमिव हालहलं विषं तेदेव तद्वेहं नतमि
त्तिमं हि रमिहलब्धावकाशोऽहिवः साधो नु जीरतीन हन्ति करिणा मेतायनाभाघटाः ॥ सहोक्ते मुखलद्धानि कलमिहृसं
गीतकंघो पितो मा यर्दीहि वसेद्धि जोयमियं तीमृ मिंसमारोपितः ॥ अत्रैकस्यैव हानोपादानयोरविवक्षितत्वान्न परिव
त्तिः । अनुमानं तदुक्तं पक्षसाध्यसाधनयोर्वचः । पक्षधर्मान्वयव्यतिरेकित्वेन त्रिरूपो हेतुः साधनम् । धर्मिणायोगव्यव
च्छेदो व्यापकस्य साध्यं । यथा पत्रैतालहरी चलाचलदृशो व्यापारयेति क्रवं । तत्रैव प्रपतन्ति मत्तममी मर्मस्पृशो मार्गणाः
॥ तच्चक्रीकृतचापमंचितशरप्रेस्वत्करः क्रोधनो धावत्यग्रत एव शासनधरः सत्यं सदास्मरः ॥ साध्यसाधनयोः पौ
र्वापर्यविकल्पेन न किंचिद्वैचित्र्यमिति न तथा दर्शितं विशेषतोपसाकृतैउन्निः परिकरस्तु सः । अर्थाद्विशेष्यस्या

उदाहरणं। महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः। न संहतास्तस्य न भेदवृत्तयः प्रियाणि वाञ्छन्त्यसु
भिः समीहितुं॥ अपुष्टार्थस्य दोषताभिधानात्तन्निराकरणेन पुष्टार्थस्वीकारः। कृतस्तथाप्येकनिष्ठत्वेन बहूनां
विशेषणानामेवमुपन्यासे वैचित्र्यमित्यलंकारमध्ये गणितः। व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनं॥ निगू
ढमपि वस्तुनो रूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन यदपह्नूयते सा व्याजोक्तिः छद्मनोद्भिन्नवस्तुरूपनिगूहनं निगूहनं
॥ निगूढमपि वस्तुनो रूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन यदपह्नूयते सा व्याजोक्तिः। न चैषापह्नुतिः। प्रकृताप्रकृतोभयनि
ष्ठस्य साम्यस्येहासंभवात्। उदाहरणं। शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्रोमाञ्चादिविसंष्ठुलाखिलवि
धिव्यासङ्गभङ्गाकुलः॥ हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान्सस्मितं शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवता
द्वः शिवः। अत्र पुलककरयोरित्यूचिवान्सस्मितं शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद्वः शिवः। अत्र पुलक
वेपथू सात्त्विकरूपतया प्रसृतौ शैत्यकारणतया प्रकाशितत्वादपलपितस्वरूपौ व्याजोक्तिं प्रयोजयतः॥ किंचित्पृ
ष्टमपृष्टं वा कथितं यत्प्रकल्प्यते। तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता। प्रमाणान्तरावगतमपि वस्तु शब्देन वस्तु
शब्देन प्रतिपादितं प्रयोजनान्तराभावात्सदृशवस्त्वन्तरव्यवच्छेदाय पर्यवस्यति सा भवेत्परिसंख्या। अत्र च कथनं प्रश्नपूर्व
कं तदन्यथा च परिदृष्टं। तथोभयत्र व्यपोह्यमानस्य प्रतीयमानता वाच्यत्वं चेति चत्वारो भेदाः। क्रमेण॥ किमासेव्यं पुं

सोसविधमनवंधंधुसरिते ॥ किमेकांतेध्येयंचरणयुगलंकौस्तुभभृतः॥ किमाराध्यंपुण्यंकिमभिलषणीयंचकरुणायदा
सक्त्याचेतोनिरवधिविमुक्त्यैप्रभवति। किंभूषणंसुदृढमत्रयशोनरत्नंकिंकार्यमार्यचरितंसुकृतंनदोषः॥ किंचक्षुरप्रति
हतंधिषणाननेत्रंजानातिकस्त्वदपरः सदसद्विवेकम्॥ कौटिल्यंकचनिचयेकरचरणाधरदलेषुरागस्ते। काठिन्यंकुचयुगले
तरलत्वंनयनयोर्वसति। भक्तिर्भवेनविभवेव्यसनंशास्त्रेनयुवतिकामास्त्रे। चिंतायशसिनवपुषिप्रायः परिदृश्यतेमहतां॥
यथोत्तरंचेत्पूर्वस्यपूर्वस्यार्थस्यहेतुता। तदाकारणमालास्यात्॥ उत्तरमुत्तरंप्रतियथोत्तरंचेत्पूर्वस्यपूर्वस्यहेतुता। तदाका
रणमालास्यात्। उत्तरमुत्तरंप्रतियथोत्तरंचेत्पूर्वस्यपूर्वस्यार्थस्यकारणंगुणप्रकर्षोविनयाल्लभ्यते। गुणप्रकर्षेणजनो
नुरज्यतेजनानुरागप्रभवाहिसंपदः॥ हेतुमतासहहेतोरभिधानमभेदतोहेत्वलंकारेणलक्षितः॥ आयुर्घृतमित्यादिरू
पोहेत्वनभूषणतांकदाचिदर्हतिवैचित्र्याभावात्॥ अविरलकमलविकासःसकलालिमदश्चकोकिलानंदः॥ रम्योयमेतिसं
प्रतिलोकोत्कंठाकरःकालः॥ अत्रकाव्यरूपतांकोमलानुप्रासमहिम्नैवसमाम्नासिषुर्नतुहेत्वलंकारः॥ कल्पनयेतिपूर्वोक्तंकाव्य
लिंगमेवहेतुः॥ क्रिययातुपरस्परंवस्तुनोर्जननेन्योन्यं॥ अर्थयोरेकक्रियामुखेनपरस्परंकारणत्वेसत्यन्योन्यना
मालंकारः॥ उदाहरणं। हंसाणसरेहिसिरीसारिज्जइअहसराणहंसेहिं। अण्णोण्णंचिअएएअप्पाणंणवरगरुअंति॥ अ
त्रोभयेषामपिपरस्परं जनकतामिथः॥ श्रीमात्रतासंपादनद्वारेण उत्तरश्रुतिमात्रतः॥ प्रश्नस्योन्नयनंयत्रक्रियते

का.प्र. ७२ 72 तेनतत्रवासति। असकृद्यदसंभाव्यमुत्तरंस्यात्तदुत्तरम्॥ प्रतिवचनोपलंभादेव पूर्ववाक्यंयत्र कल्प्यते तदेकंतावदुत्तरं। उदाहरणं। वाणिअ
हत्थिदन्ताकत्तोअम्हाणवग्घकित्तीआ। जावलुलिआलअमुहीघरम्मिपरिसक्कएसोण्हा॥ हे त्रिहतव्याघ्रकत्तीनामहमधीमत्येनताः
प्रयच्छेतिक्रेतुर्वचनमनेनवाक्येनसमुन्नीयते। नचैतत्काव्यलिंगमुत्तरस्यतादूप्यानुपपत्तेः॥ नहिप्रश्नस्यप्रतिवचनंजनकोहे
तुः। नापीदमनुमानं। एकधर्मिनिष्ठतयासाध्यसाधनयोरनिर्देशात्। इयत्तुकारणांतरमेवोत्तरंसाधीयः। प्रश्नादनंतरंलोकातिक्रांत
गोचरतयायदसंभाव्यरूपंप्रतिवचनंस्यात्तदपरमुत्तरं। अनयोश्चासकृदुपादानेनचारुताप्रतीतिरित्यसकृदुक्तं। उदाहरणं।
काविसमादिव्वगई किं। उल्लहं तणोगुणग्गाही। किंसोक्खंसुकलत्तं किंदुःखंजंखलोलोओ। प्रश्नपरिसंख्यायामन्यव्यपोहएवतात्प
र्यमिहतुवाच्यएवविश्रांतिरित्यनयोर्विवेकः। कुतोपिलक्षितः सूक्ष्मोप्यर्थोन्यस्मैप्रकाश्यते। धर्मेणकेनचिद्यत्रतत्सूक्ष्मं
परिचक्षते। कुतोप्याकारादिंगिताद्वासूक्ष्मस्तीक्ष्णमतिसंवेद्यः। उदाहरणं। वक्त्रस्यंदिस्वेदबिंदुप्रबंधैर्दृष्ट्वाभिन्नंकुंकुमंकापिकं
ठे। पुंस्त्वंतन्व्याव्यंजयन्तीवयस्यास्मित्वापाणौखड्गलेखांलिलेख। अत्राकृतिमालोक्यकयापिवितर्कितंपुरुषायितम
सिलतालेखनेनवैदग्ध्यादभिव्यक्तिमुपनीतं। पुंसामेवकृपाणयोग्यत्वात्। यथावा। संकेतकालः कयाविदिंगितमा
त्रेणविदितोनिशासमयशंसिनाकमलनिमीलनेनलीलापद्मप्रतिपादितः। उत्तरोत्तरमुत्कर्षोभवेत्सारः परावधिः। परः प
र्यंतभागोवधिर्यस्यधाराधिरोहितयातत्रैवोत्कर्षस्यविश्रामः। उदाहरणं। राज्येसारंवसुधावसुधायांपुरेसौधंसौधेत राम. ७२

तत्त्वंतत्त्वेश्वरांगातानांगसर्वसर्वाभिन्नाहेशातयात्तत्त्वकार्यकारणाभः तयोः। युगपद्धर्मयोर्यत्रख्यातिः सास्याद्वसंगतिः। इहापद्दे
शेकारणांतहेश्चमेवकार्यमुत्पद्यमानंदृष्टं। यथाक्ष्माहदि। यत्रहेतुफलरूपयोरपिधर्मयोः केनाप्यतिशये ननानाहेशातयायुगपद्धवभा
सनंचसाचतयोः स्वभावोत्यन्तपरस्परसंगतिया गाढसंगतिः। उदाहरणं। जसेमच्चवणो तसेवेग्गा तामराइंजणो ग्गलिग्गाइंतकवग्गंक
वोलेवहूएविक्कमासवत्तीराएषाचविशेषवाधिनी नविरोधः। भिन्नाधारतयैवद्वयोरिहविरोधितायाप्रतिभासात्। विरोधेतुवि
रोधित्वमेकाश्रमनियमनुक्रमपिपर्यवसितमयवाहविषयपरिहारेणोत्सर्गस्यव्यवस्थितेः। तथाचेहनिदर्शितासमाधिः सुक
रंकार्यकारणांतरयोगतः। साधनांतरोपकृतेनकर्त्तीयहल्केशेनकार्यमारब्धमाधीयते। समाधिर्नाम। उदाहरणं। मानमस्याति
राकर्तुंयाहयोमेपतिष्यतः। उपकारायदिष्ट्येदंमुदीर्णंघनगर्जितं। समंयोग्यतयोग्योपाहिसंभावितः क्वचित्। इहमनयोश्त्ला
घ्यमितियोग्यतयासंबंधस्यनियतविषयमध्यवसानंचेत्तदासमं। तत्सद्योगेऽसद्योगेचउदाहरणं। धातुःशिल्पातिशयनिकष
स्थानेमेषाम्रगाक्षीन् येदेवोप्यपमनुपमोहन्तयत्नः स्मरज्यस्य। जातेहैवात्सदृशमनयोः संगतेयत्नेदृतछृंगारस्योपनतमधुना
राज्यमोकातयत्नाः। यथावा। चित्रेचित्रेवततवतमहचित्रमेतद्धिचित्रंजातोदैवादुचितरचनासंविधाताविधाता। पत्निम्वानांपरिणत
फलस्फातिरास्वाद्यतीयायचैतस्याः कवलनकलाकोविदः काकलोकः। कचिद्घट्टातिवैधर्म्यात् श्लेषोघटनामियात्। कर्तुः
क्रियाफलावाप्तिर्नैवानर्थश्चयद्भवेत्। गुणक्रियाभ्यांकार्यस्यकारणस्यगुणक्रिये। क्रमेणचविरुद्धेयत्सएषविषमोमतः। दृयो

का.प्र. रत्वं तद्विलक्षणतया यदनुपपद्यमानतयैव योगः प्रतिपद्यते यच्चापि किंचिदारभमाणः कर्त्ता क्रियायाः फलात् केवलमभीष्टं त
७३ स्फलं न लभते । यावदप्रार्थितमप्यनर्थं विषममासादयेत् । तथा सत्यपि कार्यस्य कारणरूपानुकारो यत्नतो गुणक्रियाभ्यां परस्परवि
73 रुद्धतां व्रजेत् ॥ स एष विषमालंकारश्चतूरूपो विषमः । क्रमेणोदाहरणं । शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना । अयं क्व च
कुकूलाग्निककर्कशो मदनानलः ॥ सिंहिकासुतसंत्रस्तः शशः शीतांशुमाश्रितः । जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः ॥
सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा । तमालनीला शरदिंदुपांडु यशस्त्रिलोक्याभरणं प्रसूते ॥ आनंदममंदमिम
मिमं कुवलयदललोचने ददासि त्वं । विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥ अत्रानंददानं शरीरतापेन विरुध्यते । एवं विपुले
ने सागरशयस्य कुक्षौ भुवनानि यस्य पपिरे युगक्षये । मदविभ्रमासकलया पपे स पुरस्त्रियैकतमयैकदृशोऽल्पाहावपिवि ष
मत्वं यथायोगमवगंतव्यं । महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात् । आश्रयाश्रयिणोः स्यातां तनुत्वेऽप्यधिकं तु तत् ॥ आश्रि
तमाधेयं । आश्रय आधारः । तयोर्महतोरपि विषये तदपेक्षया तनुत्वेऽप्याश्रयाश्रयिणोर्यत्सत्तनवत्त्वप्रकर्षापेक्षया यथा
क्रमं यदधिकतरतां व्रजतस्तदिदं द्विविधमधिकं नाम । क्रमेणोदाहरणं । अहो विशालं भूपाल भुवनत्रितयोदरं । माति मातु
मशक्योऽपि यशोराशिर्यदत्र ते ॥ युगांतकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत । तनौ ममुस्तत्र न कैटभद्विषस्त रा.म.
पोधनाभ्यागमसंभवा मुदः ॥ प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया ॥ या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते यत्कृतिपरम ७३

पि विपक्षं साक्षात्तिरसितुमशक्तेन केनापि तमेव प्रतिपक्षमुत्कर्षयितुं तदाश्रितस्य तिरस्करणात् तदनीकप्रतिनिधितुल्यत्वात् प्रत्य
नीकमभिधीयते । यथानीकेऽभियोज्ये तत्प्रतिनिधीभूतमपरं स्मढे तपा केनचिदभियुज्यते । तथेह प्रतिपक्षिणि विजेये तदी
योऽन्यो विजीयत इत्यर्थः ॥ उदाहरणं ॥ त्वं विनिर्जितमनोभवरूपः सा च सुन्दर भवत्यनुरक्ता । पञ्चभिर्युगपदेव शरैस्तां तापयत्यनुश
याद्दिव कामः ॥ यथापस्य किंचिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः । कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनापि बा
धते ॥ इहोत्तरतरीयतासंबन्धिसुखसंबन्धात् । समेन वस्तुना लक्ष्मणा वस्तुवस्तुनापह्नुतिः । वस्तुतो निजेनागन्तुना वापि तन्मीलितमि
ति सूत्रार्थः सहजमागन्तुकं वा । किमपि साधारणं यल्लक्षणं तद्द्वारेण किंचित्केनचिद्वस्तु स्थित्यैव बलीयस्तया तिरोधीयते । तन्मीलितमि
ति द्विधा स्मरन्ति । क्रमेणोदाहरणं । अपाङ्गतरले दृशौ मधुरवक्रवर्णा गिरो विलासभरमन्थरा गतिरतीव कान्तं मुखं । इति स्फुरितमङ्ग
के मृगदृशः स्वतो लीलया तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते ॥ अत्र हृद्यकरलालिकमं गस्य लिङ्गं स्वाभाविकं साधारणं च मदोद्दृ
येन तत्राप्येतस्य दर्शनात् । ये कंदरासु निवसन्ति सदा हिमाद्रेस्त्वत्पातशङ्कितधियो विवशा द्विषस्ते । अप्यङ्गमुत्पुलकमुद्
वहतां सकम्पं तेषामहो बत भियां न बुधोऽप्यभिज्ञः । अत्र तु सामर्थ्यादिहवपितस्य शैत्यस्यागन्तुकत्वात्तत्संभवयोरपि कम्पपु
लकयोस्तादृप्यं समानता । भयोत्थापितयोरुपलक्षितत्वात् । स्थाप्यते पोष्यते वापि यथा पूर्वं परं परा । विशेषणात्पाव
त्रवस्तुसेकोवेती द्विधा । पूर्वं पूर्वं प्रतिपत्तौ तरोत्तरस्य वस्तुनो वैलक्षण्याविशेषणभावेन स्थाप्यते निषेधो वा संभवति सा द्विधा

का.प्र. द्धैरेकावलीभण्यते। क्रमेणोदाहरणं। पुराणि यस्यां सवराङ्गनानि वराङ्गना रूपपुरस्कृताङ्ग्यः। रूपं समुन्मीलितसद्विलासमस्त्रं
७४ विलासः कुसुमायुधस्य॥ न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदं न षट्पदोऽसौ कलगुञ्जितो न यो न गुञ्जितं तन्न जहार
74 यन्मनः॥ पूर्वत्र पुराणां वराङ्गनाभिः साम्यं गविशेषणमुखेन रूपं तस्य विलासास्तेषामप्यस्त्रमित्यमुना क्रमेण विशेषणं विधी
यते उत्तरत्र प्रतिषेधेऽप्येवमेव। ज्ञेयं यथानुभवमर्थस्य दृष्टस्य तत्सदृशे स्मृतिः। स्मरणं यः सदृशार्थः केनचिद्द्वारेणानियतो यद्वा कदापि वि
दृष्टः तेन स कालान्तरे स्मृतिप्रबोधाधायिनि तत्समाने वस्तुनि दृष्टे सति यत्तथैव स्मर्यते तत्स्मरणं॥ निम्ननाभिकुहरेषु यदम्भः
प्लावितं चलदृशां लहरीभिः। तद्भवेत्स्मरणं। उदाहरणं। निम्ननाभिकुहरेषु यदम्भः प्लावितं चलदृशां लहरीभिः। तद्भवैः कुह
रुतैः सुरनार्यः स्मारिताः सुरतकण्ठरुतानां॥ यथा वा। करजुअगहिअजसोआथणमुहविणिवेसिआहरपुडस्स। संभरिअपंचज
ण्णस्स णमह कण्हस्स रोमंचो॥ भ्रान्तिमानन्यसंविन्मतत्तुल्यदर्शने। तदित्यन्यद्दृष्टाकरणिकमाश्रियते। तस्य तथाविधस्य दृष्टौ संस्थो
यद्दृष्टाकरणिकतया संवेदनं स भ्रान्तिमान्॥ न चैष रूपकं प्रथमातिशयोक्तिर्वा तत्र वस्तुतो भ्रमस्याभावात्॥ इह वार्थानुगमने
न संज्ञाया प्रवृत्तेः स्वस्वरूपमेव प्रतिपन्नत्वात्॥ उदाहरणं। कपाले मार्जारः पयः इति करान्लेढि शशिनस्तरुच्छिद्रप्रोतान्बिसमिति क राम।
री संकलयति रतान्ते तल्पस्थान्हरति वनिताप्यंशुकमिति प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति॥ आक्षेप उपमानस्य प्रतीपमुपमे ७४
यता। तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धनं॥ अस्य धुरं सुतरामुपमेयमेव वोढुं प्रौढमिति कैमर्थ्येन यदुपमानमाक्षिप्यते। य

हापितस्यैवोपमानतयाप्रसिद्धस्योपमानांतरविवक्षया नाहरार्थमुपमेयभावः कल्प्यते। तदुपमेयस्योपमानं प्रतिकूलवर्त्तित्वादु
मयरूपम्। तीयं। क्रमेणोदाहरणा लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा। इ
न्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं चिन्तारत्नमहो मुधैव किमभी क्ष्माभृतः कुलक्ष्माभृतः॥ एष हि हारव संहरिकरणं दाऊणास्तु
णामुवस्त्र शिणाजुंनानुन्नमुहेरोनिसौ अरिविंहोउपमिजुदजरोन। अत्रमुखेनोपमीयमानस्य शशिनः स्वल्पतरगुणत्वादुपमितेर्निष्पन्नत्वाव
अणिजामितिवचनीयपदाभिव्यंग्यत्याति रस्कारः॥ क्वचित्तु निष्पन्नैवोपमितिक्रिया अनादरनिबंधनोपयोगार्थमसवात्यमिमंलो वन
प्रगलेन किंवदमिमुग्धेसन्तीदशानि दिशोदिशि सरः सुनवनीलनलिनानि इहोपमेयीकरणमेवोत्पलानाम मनोहरः॥ अनयैवरीत्या पद
सामान्यगुणयोगान्नोपमेयभावमप्यनर्हतः पदं वितस्य तत्कल्पनायामपि भवति प्रतीयमितिः प्रमितिप्रत्येतव्यं यथा। अहमेव गुरु
: सुदारुणानामितिहालाहलतात मास्म दृप्यः॥ ननु सन्ति भवादृशानि भूयो भुवनेस्मिन्वचनानि दुर्जनानां॥ अत्रहालाहलस्यो
पमानत्वमसंभाव्यमेवोपनिबद्धं॥ प्रस्तुतस्य पदार्थेन गुणसाम्यविवक्षया॥ एकात्म्यं बध्यते योगात्तत्सामान्यमिति स्मृतम्। अत्ताह
रामपितादृशातपाविवक्षितुं पदं प्रस्तुतार्थेन संपृक्तमपरित्यक्तनिजगुणमेवतदेकात्मतया निबध्यते तत्समानगुणनिबंधनात्सामा
न्यं मलयजरसविलिप्ततनवो नवहारलताविभूषिताः॥ सिततरदन्तपत्रकृतवक्त्रचिरामलाभुकाः॥ शशभृति विततधाम्नि ध
वलयति धरामविभाव्यतां गताः। प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियोऽभिसारिकाः॥ अत्रप्रस्तुततरस्यापोरनेतिरिक्ततयातिवदुध

का.प्र. ७५ वलत्वमेकालम्बनाहेतुः। अतएव प्रथमभावेनानन्तयोऽनुपलक्षणं। प्रथमावाधेन्नत्वयातुल्यतुच्चांवधन् नांकसाग्नितोगंउतत्वयाता नि। संगाः
सहेलेयाद्दिनापतिव्यकोवेहयिष्यन्तवबंयकाति। अत्रानिसिन्तांतरजनितापिनानात्वप्रतीतिः प्रथमप्रतिपन्नममेहंनयुद्दसिनुमस
75 हतोप्रतीतत्वान्नस्यप्रतीतेश्च बाधायोगात्। विनाप्रसिद्धमाधारमाधेयस्यव्यवस्थितिः। एकात्मायुगपद्वृत्तिरेकस्यानेकगोचरा। अन्यत्
प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः। तथैवकरणं चेति विशेषस्त्रिविधः स्मृतः। प्रसिद्धाधारपरिहारेण यदाधेयस्य विशि
ष्टा स्थितिरभिधीयते स प्रथमो विशेषः। उदाहरणं। दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषां रमयन्ति जगन्ति गिरः कथमि
ह कवयो न ते वंद्याः। एकमपि वस्तु यदेकेनैव स्वभावेन युगपदनेकत्र वर्तते। स द्वितीयः उदाहरणम्। सा वसइ तुह हिअए स
च्चिअ अच्छीसु सा अ वअणेसु। अम्हारिसाण सुंदर ओआसो। स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजतानवद्यविद्यं। विधिना ससृजे न
वो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च। यथा वा। गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ। करुणाविमुखे
न मृत्युना हरता त्वां वद किं न मे हृतम्। सर्वत्रैवंविधविषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते। तां विना प्रायेणालंकारत्वायोगात्। अ
त एवोक्तं सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते। यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विनेति। स्वमुत्सृज्य गुणं योगादत्युज्ज्वल
गुणस्य यत्।। तद्वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः। वस्तु तिरस्कृतनिजरूपं केनापि समीपगतेन प्रगुणतया स्वगुणसंपदोपरक्तं राम.
तत्प्रतिभासमेव यत्समासादयति स तद्गुणः। तस्याप्रकृतस्य गुणोऽत्रास्तीति। उदा। विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परित ७५

॰ स्फुरंत्या । र । लै॰ पुनर्य त्रत्र च चानुविं स्वामानि न्विरेवं शाकरीरनीलै॰ । अत्र रवितुरगापेक्षया गउरागतजस्या तद्यपेक्षया चहरि
रमरणीनांप्रगुणवर्णिता ॥ तद्रूपननुहारश्लेषस्य ततस्या हतद्गुण॰ । यदि तु तद्गीयं वर्णसंभवं स्यामपियोग्यता यामिहन्यूनगुणानग
ह्लीपात्तद्ाभवेत्तद्गुणो नाम ॥ उदा । धवलोसि जइ वि सुंदर तह वि तुपेस मजुरं जिअं हि अ अंगराअभरिअविहिअ अरस्स हअं रागाहितो
रारत्तोसि ॥ अत्रातिरक्तो नापि मनसा संयुक्तो नरक्ततामुपगतइत्यतद्गुण॰ ॥ किंच तहि स्वप्रकृतमस्पेतिव प्रकृतमन्नामिहिस्यते तेतय
द्प्रकृतस्य स्वं प्रकृतेन कुतोपिति मित्तान्तानुविधीयते सोऽद्गुणाइत्यपि प्रतिपत्तव्यं । यथा । गांगमंबु सितमंबुयामुनं कज्जलाभमुभयत्र म
ज्जत॰ । राजहंस तव सैव शुभ्रता चीयते न च न वापचीयते ॥ यद्यथासा । चितके नाप्यपरेणातद्गुणो यथा ॥ तथैव यद्विधीयेत सख्या यातद्ग ति स्मृत
॰ । येनोपायेन यद्वेके नोपक्लिप्तं तस्यान्येन जिगीषुत या तद्गुयापकमेव यद्यन्यथाकरणं समातव धिवस्तु व्याहतिहेतुत्वाद्व्याघात॰ इदं शार
ग्धमनस्मिं जीवयन्ति दृशैव याः ॥ विरूपाक्षजयिनोस्तु॰ स्तुवे वामलोचना॰ ॥ सेयं संसृष्टिरेतेषां भेदे नैकत्र या स्थितिः॰ । एतेषां समनंत
रमेवोक्तस्वरूपाणां यथासंभवमन्योन्यनिरपेक्षतया । यदिह शब्दमात्रगत्वेनार्थविषयत्वेनोभयत्रापि वावस्थानं से कार्यसमवायसंबं
धस्वभावा संसृष्टि॰ । तत्र शब्दालंकार संसृष्टि॰ । वदनमसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया । चलितया विदधे कलमेख
लाकलकलो लहदृशाऽन्यया । अथालंकार संसृष्टि॰ । लिंपतीव तमोङ्गानि वर्षतीवांजनं नभः॰ असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता । य
द्यत्र परस्परनिरपेक्षौ यमकानुप्रासौ संसृष्टिप्रयोजकत॰ । उत्तरत्र तु तथाविधावुपमोत्प्रेक्षे । शब्दार्थालंकारयो॰ संसृष्टि॰ । सोणात्यि

का॰प्र॰ ७६ एत्युगामे जोऽप्यत्रं महमहत्तला स्तरांग। तनुरागा ताहि अल्प डिं परिसकान्ति गिरिवारेद्रा। अत्रानुप्रासो रूपकेचान्यो न्यानपेक्षे। संसर्गतश्च त
७६ योरेकत्रवाक्ये छन्दसि वा समवेतत्वात्। अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु संकरः॥ एत एव यत्रात्मन्यनासादितस्वतन्त्रभावाः पर
स्परमनुग्राह्यानुग्राहकतां दधाति स एषां संकीर्यमाणस्वरूपत्वात् संकरः। उदाहरणं। आत्ते सीमंतरत्ने मरकतिनि हृते हेमताट
कपत्रे लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे गृहीते। शोणं बिम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये राजन् गुञ्जाफला
नां स्रजइति शवरा नैव हारं हरन्ति। अत्र तद्गुणमपेक्ष्य भ्रान्तिमता प्रादुर्भूतं तदाश्रये ण च तद्गुणः। स चेतसां प्रत्यक्षतः इति भिन्न
मित्यनयोरङ्गाङ्गिभावः। यथा जटाभाभिर्भाभिः करधृतकलङ्काक्षवलयो वियोगिव्यापत्तेरिव कलितवैराग्यविशदः। परिप्रेंख
त्तारापरिकरकपालाङ्किततले शशी भस्मापाण्डुः पितृवन इव व्योम्नि चरति। उपमारूपकमुत्प्रेक्षा श्लेषश्चेति चत्वारोऽत्र एवं अङ्गाङ्गि
तया प्रतीयन्ते। कलङ्क एवाक्षवलयमिति रूपकपरिग्रहे करधृतत्वमेव साधकप्रमाणतां प्रतिपद्यते। अस्य हि रूपकत्वे तिरोहित
कलङ्करूपमक्षवलयमेव मुख्यतयावगम्यते। तस्यैव च करग्रहणयोग्यतायां सार्वत्रिकी प्रसिद्धिः। स्वेच्छया यमानुकलङ्कस्य करधा
रणमसम्भवमुपचर्य योज्यते उत्प्रेक्षांकेन कलङ्कस्य मध्येऽवस्थानात् कलङ्को ऽक्षवलयमिवेति रूपमाया कलङ्कस्यालङ्कृतया प्रति
पत्तिः। न चास्य करभ्रमत्वतो सीति मुख्येष्वुपचार एव शरणं स्यात् एवं रूपश्च संकरः शब्दालङ्कारयोरपि परिदृश्यते। यथा। राजति
तटीयमभिहतघनहा नवरासातिपातिसारावनद्धा। जगतीबद्धपथमविरलहा नवरासातिपरुतिसारावनद्धा। अत्र यमकमनुलोमप्रतिलो

राम॰ ७६

मश्चाचित्रमेतत्॥ पादद्वयगते परस्परापेक्षे। एकस्य च ग्रहे न्यायदोषाभावात् निश्चयः॥ द्वयोर्वहूनां वालंकाराणामेकत्रसमावेशे विरोधा
घात्र युगपदवस्थानं। नचैकतरस्य परिग्रहे साधकं तदितरस्य परिहारे वाधकमस्ति। येनैकतरस्य परिग्रहः स्यात्। स निश्चयाभावरूपो द्वि
तीयः॥ संकरस्य समुच्चयेन संकरस्यैवावाप्तेः पात्। उदाहरणं। जहणो जहरअणाणि जरोजहरत्र निम्मलच्छा अनह किं विहिणा एसो सरस
पाणि अजलनिहि णकउं॥ अत्र समुद्रप्रस्तुते विशेषणसाम्यादप्रस्तुतार्थप्रतीतेः किमसौ समासोक्तिः। किं मद्गुरप्रस्तुतस्य मुखे
नकस्यापि तत्समग्रतया प्रस्तुतस्य प्रतीयते रिय मप्रस्तुतप्रशंसेति संदेहः॥ यथा वा। नयनानंददायीन्दोर्बिम्बमेतत्प्रसीदति।
अधुनापि निरुद्धाशमविशीर्णमिदं तमः॥ अत्र किं कामस्योद्दीपकः कालो वर्तत इति भंग्यंतरेणाभिधानात् पर्यायोक्तं पुनतद्द
द्दनस्येन्दुर्बिंबतयाध्यवसानादतिशयोक्तिः॥ किं चेतदितिवक्रोक्तिर्हि उपत इ पारोपवशाद्रूपकं। अथवा तयोः समुच्चयवि
वक्षायां दीपकं। अथवा तुल्ययोगिता किं तु प्रदोषसमये विशेषणसाम्यादाननस्यावगतौ समासोक्तिः॥ आहो स्विन्मुखवर्ने
सत्यप्रस्तावादप्रस्तुतप्रशंसेति वहूनां संदेहादयमेव संकरः॥ यत्र तु न्यायदोषयोरन्यतरस्यावतारस्तत्रैकतरस्य निश्चया
न्न संशयः॥ न्यायश्च साधकत्वमनुकूलता। दोषोपि वाधकत्वं प्रतिकूलता। तत्र सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव
हासद्युतिरित्यत्र मुखस्य तया वगम्यमाना हासद्युतिर्वक्त्रे एवानुकूल्यं भजते। इत्युपमायाः साधकं। शशिनि तु न तथा प्रति
कूलेति रूपतितस्याः वाधकता। वक्त्रेन्दौ तव सत्ययं पदपरधृशीतो मुरम्भुषे इत्यत्रापरत्रामिंदोरनुगुणं न तु वक्त्रस्य प्रतिकू

का.प्र. त्वमिति रूपकस्य साधकतां प्रतिपद्यते ॥ न च यमाया वाधकतां । राजनारायणं लक्ष्मीस्त्वामालिंगति निर्भरमित्यत्र तु मणालिंग
७७ नमुपमां निरस्यति । सदृशं प्रति प्रेयसी प्रयुक्तस्यालिंगनस्यासंभवात् । पादांबुजं भवतु नो विजयाय मंजुमंजीरसिंजितमनोहरम
77 म्बिकायाः इत्यत्र मंजीरसिंजितं संबुजे प्रतिकूलसंभवादिति रूपकस्य वाधकं न तु पादे ऽजकूलमित्युपमायाः साधकम
भिधीयते । विध्युपमर्दिनो वाधकस्य तद्रूपेसपोल्कटत्वेन प्रतियन्नो एवमन्यत्रापि सुधीभिः परीक्ष्यो स्फुटमेकत्र विषये श
ब्दार्थालंकृतिद्वयं व्यवस्थितं च । अभिन्न एव पदे स्फुटतया पद्मावपि शब्दार्थालंकारौ व्यवस्थां समासादयतः सोप्यप
र एव संकरः ॥ उदाहरणं । स्पष्टोल्लसत्किरणकेसरसूर्यबिंबविस्तीर्णकर्णिकमथो दिवसारविंदं । श्लिष्टाष्टदिग्दलकलापमु
खावतारबद्धांधकारमधुपावलिसंचुकोच । अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ ॥ ते नासौ त्रिरूपः परिकीर्तितः ॥ तदा
यमनुग्राह्यानुग्राहकतया संदेहेनैकपदप्रतिपाद्यतया च व्यवस्थितत्वात्त्रिप्रकार एव संकरो व्याकृतः ॥ प्रकारां
तरेण तु न शक्यो व्याकर्तुं मानंत्यात्तत्प्रभेदानामिति । प्रतिपादिताः शब्दार्थोभयगतत्वेन वैविध्यजुषो लंकाराः ॥
नु ः पुनरेषां नियमो यदेतेषां तुल्येपि काव्यशोभातिशयहेतुत्वे कश्चिदलंकारः ॥ शब्दस्य कश्चिदर्थस्य कश्चिच्चो
भयस्येति चेन्न । उक्तमत्र । यथा काव्ये दोषगुणालंकाराणां शब्दार्थोभयगतत्वेन व्यवस्थायामन्वयव्यतिरेकावेव राम.
प्रभवतो निमित्तांतरस्याभावात् । ततश्च यो लंकारो यदीयान्वयव्यतिरेकावनुविधत्ते स तदलंकारो व्यवस्थाप्यते तद ७७

ति। एवं च यथा पुनरुक्तवदाभासः परंपरितरूपकं चोभयोः भावाभावानुविधायित्वादुभयालंकारौ। तथा। उक्तहेतुकार्था
तरन्यासप्रभृतयोऽपि प्रदर्श्याः। अर्थस्य तु तत्रैव वैचित्र्यमुल्लकृततया प्रतिभासत इति वाच्यालंकारमध्ये वस्तुस्थितिमन
येक्ष्यैव लक्षिताः। योऽलंकारो यदाश्रितः स तदलंकार इत्यपि कल्पनायामन्वयव्यतिरेकावेव समाश्रयितव्यौ। तत्र ह्याश्रयपराम
र्शेण विच्छित्त्याश्रयाश्रयिभावस्याभावात्स्याभावाहितसंतिकाराणां पयेता। निमित्त एव परस्परव्यतिरेको ज्ञापयानः। एवं च हे
याप ष्यायोगसंभवन्नोऽपि केचनाउक्तौ पवन्तः भवंतीति न पृथक्प्रतिपादिताः॥ तथा स्वनुमानस्य प्रसिद्धमावो वैफल्यं हि
विरोध इति ये त्रयोऽनर्थास्तनामसिद्धिविरुद्धतामपुष्टयर्थं स्वप्रतिकूलवर्तीती च यथाक्रमेन प्रतिक्रामतीति। तास्वभावे
त्वात। के मे रोगा हा हरतो चकी चकारपंक्तिहरिरपि च वहं दीर्घजिह्वदुर्जुर्लंन्वान न स्त्रन्न तत्राथा ऽनुगाम पिच्चत गाः
कृत्तरोगन्तकुवेरघ। रेह संघसुरागांजगद्दयहृतये नि रवयक्रौ स्पृपस्त्रत्ता। तिपसेन्नोन्वहमहिमनुचः सो ऽ
वतोरस्यं हनोवः। अत्र कर्तृकर्मप्रतितियमेन स्तुतिरनुप्रासानुरोधेन वस्तुता। नपुरारोति हा स्मारिष्ठ तथाप्रतीते
तिप्रसिद्धिविरोधः। पसरता तउरिरमान्मातरंगा रामं हिरमानेहस्यान्हिमं हरेरं उम। विपहिसल्लीलो लोपि निगच्छ
सितालि त्वहीयं मे। अन्तरगुररा न्मातिमेरवल्लमविरतसिंजातमनुमञ्जीरं॥ पदि सरराम नुरावरगोरसारराकमकारसांकु उ
ते॥ अत्र वाच्यस्य विचिन्त्यमाननकिंचिदपि चाउत्वप्रतीपतः स्त्वप्रष्वस्यतयैवानुप्रासस्य वैफल्यमा। अकुंठोत्कंठापापदर्गा

का॰प्र॰ मार्कंडं कमलं कठिनं। कं वकं यासरां केटे कुतु कंठानि मुद्गर मंगारे पऊषवर्णाउ स्वरं पर्वोक्तरीत्या विज्ञेयत इति पुनः पाजपा सोत्र प्रति
७८ कूलवर्णानाहत्ति विरोधः। यमकस्य पादत्रयगतत्वेन यमनमप्रयुक्तं दोषः। यथथा भुजंगमस्येव मणिः। सदंभा मरारा वकीर्णवत
78 दीसदंभाः। दुरन्तां तिरगीयतो पिजन्तोः कर्षन्ति चेतः। प्रमुदे संरंभाः। उपमायामुपमानस्य जातिप्रमाणगतं न्यूनत्वमधिकता
वा तादृश्यं त्वनुचितार्थत्वं दोषः। धर्मा श्च येनुत्यनाधिक्यं यथा कसंहीनपदत्वमधिकपदत्वं च तन्न्यभिचरन्नव्यभिचरितः। कसे
गणोहाहरणं। चांडालैरिव युष्माभिः साहसपरमं कृतं वहिस्फुलिंगइव मा जरयं चकास्ति। अयं पद्मासनसीनश्चक्रवाको विराजते
युगादौ भगवान्वेधा विविनिर्मित्सुरिव प्रजाः॥ पातालमिव ते नाभिः स्तनौ क्षितिधरोपमौ। वेणीदंड पुनरयं कालिंदीपात्रसन्निभ
मः। अत्र चांडालादिभिरुपमानैः प्रक्तानोथोस्य थमेवक दर्शित इत्यनुचितार्थता। सम्मुनित्ती छित्तो मौज्याक्तमा जिनपदंवहन्नाव्य
राजन्नीलजीमृतभागात्तिष्व इवांशुमान्। अत्रोपमानस्य मौर्वीस्थानीयस्तडित्सरगो धर्मः केनापि पदेनानप्रतियादित इति हीन
पदत्वं। सपीतवाससः प्राप्ते हीनतज्ञात् मनोज्ञमीमेवपुराधकमतः। शातक्रुंदेज्ञायधवान्निज्ञायांसरज्यमानः शशिनेव मेघः।
अत्रोपमेयस्य शंखचक्रेर तिर्हिग्रे ज्ञिनाग्नहणमतिरिच्यत इत्यधिकपदत्वं लिंगवचनभेदोप्युपमानोपमेययोः। साधारणं चेद्धर्ममन्य
रूपं कुर्यात्न्यदेकतरस्यैव तद्धर्मसमन्वयावगतेः सविशेषणस्यैव तस्योपमानत्वमुपमेयकुर्यात तदेकतरस्यैव तद्धर्मसमन्वयावगते राम॰
॥ सविशेषणस्यैव तस्योपमानत्वमुपमेयकुर्यात्तदेकतरस्यैव तद्धर्मसमन्वयावगते॥ सविशेषणस्यैव तस्योपमानत्वमुपमेयत्वं वा प्र ७८

तीयमाने न धर्मे लुप्ता प्रतीयते इति प्रक्रांतस्यार्थस्य स्फुरति। विहाय तस्य भग्नप्रक्रमरूपत्वं यथा चित्रं ज्ञारलमिव च्युतो सिकरतो धिग्मं द
भागस्य मे॥ सक्तैचोभस्मितादेव मुद्राः कुलवधूरिवाय त्र नुतानातो लिंगवचनयोः सामान्याभिधायिपदस्य रूपभेदेन नोपपद्यते। न त
त्रैतद्दूषणावतारः॥ उभयथाप्यस्यानुगमत्वमस्वभावत्वात्। यथा गुरोरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः॥ तद्दैषास्य ह ज्ञोन्याभिः स्त्री
भिर्भिधुरतामतः ह धत्ते स्म परांज्ञो मांत द्वीयाविभ्रमाइवेति। कालपुरुषविध्यादिभेदेपि न तथा प्रतीतिः स्खलितरूपतया विश्रांति
मासादयती यासावपि भग्नप्रक्रमतयैव व्याख्याता यथा। त्रातिथिन्नामका कुस्था पुत्र मायकुसुमे इती। यच्छिमाघामि नीयामात्यसादमि
वचे तना॥ अत्र चैतन्ना प्रसाद मात्पो तिन पुनराणेति कालभेदः। प्रत्यग्रमज्जनविशेषविविक्तमूर्तिः कौसुंभरागरुचिरस्फुरदंशु
कान्ता॥ विभ्राजसे मकरकेतनमर्चयन्ती वालप्रवालविटपप्रभवा लतेव॥ अत्र लता विभ्राजते न तु विभाभ्राजते न तु विभ्राजस इति सं
वोध्यमाननिष्ठस्य परभागस्यासंबोध्यमानविषयतया व्यत्यासात्पुरुषभेदः। गंगेव प्रवहतु ते सदैव कीर्तिरित्यादौ। गंगा प्रवहति
ति। अप्रवर्तनात्मनो विधेः। एवं जीतीयकस्य वान्यस्यार्थस्योपमानगतस्यासंभवाद्विध्यादिभेदः। न तु नु समानमुच्चारितं
प्रतीयमानं स्वधर्मीतरमुपमापामुपमेयस्य प्रकृतधर्मी भिसंबंधात्कश्चित्कालभेदोस्ति। यत्राप्युपात्तेनैव सामान्यधर्मेणोपमाव
गम्यते। यथा युधिष्ठिर इवायं सत्यं वदतीति तत्र युधिष्ठिर इव सत्यवाद्ययं वदतीति प्रतिपत्त्या महोसत्यवादीसत्यं वदतीति। न च
यो न उ न्नयमार्योकनीयं। रैयो ष पुल्लातीतिवत्। युधिष्ठिर इव सत्यवचनेन सत्यवाद्ययमित्यर्थावगमात्। सत्यमेवेतत्। किं तु स्थितेते

का॰प्र॰ ष्वप्रयोगेषु समर्थत्वमिति । ननु सर्वथा नवधर्मास्त्यनवस्तुप्रतीतिविघातादिति सर्वे त एवात्र प्रमाणम् ॥ असादृश्यासंभवावप्युपमायामनु
७६ चितार्थतायामेव च पर्यवस्यतः । यथा । ग्रथ्नामि काव्यशशिनं विततार्थरश्मिं । अत्र काव्यस्य शशिना अर्थानां च रश्मिभिः साधर्म्यं कुत्रापि
29 न प्रतीतमित्यनुचितार्थं । निर्येन्नुरस्यादिव तस्य दीप्ता ग्रा धनुर्मण्डलमध्यभाजः । जाज्वल्यमाना इव वारिधारा दिदृक्षताजन्ट परिवेषिरागो
र्घोता । अत्रापि ज्वलन्त्यो मधुधाराः सूर्यमण्डलान्निष्पतन्त्यो न संभवन्तीत्युपनिबध्यमानोऽर्थो नौचित्यमेव पुष्णाति । उत्प्रेक्षायामपि संभा
वनं ध्रुवेवादयः शब्दा वक्तुं सहन्ते न यथाशब्दोऽपि । केवलस्यास्य सादृश्यस्य धर्मसंबन्धप्रतिपादकत्वं तु पर्याप्तत्वात् । न स्यचास्याम विवक्षितत्वा
त्तत्राशक्तिरस्यामवाचकत्वदोषः । यथा । उदययौ दीर्घिकागर्भान्मुकुलं मेचकोत्पलं । नारीलोचनचातुर्यशंकासंकुचितं यथा । उत्प्रे
क्षितमपिताऽलिकेनतत्स्येणरणापरिवर्जितत्वात्त्रन्नि उपाख्यपख्यां तत्स समर्थनायहृयदर्थान्तरन्यासोपादानं तदा लेख्यमिव गगनतत्त्वेऽसंत
मसमीचीनमितिनिविषयत्वमेव तस्यानुचितार्थत्वे वहोषः । यथा हि वाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारं क्षुद्रेऽपि नू
नं शरणं प्रपन्ने ममत्वमुच्चैः शिरसामतीव । अत्राचेतनस्य हि वाकरात्त्रास एव न संभवतीति कुत एव तत्संयोजितमद्रिणा परि
त्राणं संभावितेनन्रूपेण प्रतिमानसमानस्यास्य न कथंचिदनुपपत्तिरत्रावतरतीति समर्थ एवता । समर्थनायामपत्वं साधारणवि
शेषणावशादेव समासोक्तिरनुक्तमप्युपमानविशेषं प्रतिपादयतीति तस्यात्र पुनरुपादाने प्रयोजनाभावादनुपादेयत्वात् । यत्र एम॰
हपुष्टार्थत्वपुनरुक्तावाहोषः ॥ यथा । स्पृशति तिग्मरुचौ ककुभः करैर्दयितयेव विजृम्भिततापया । अतनुमाननपरिग्रहयास्थि ७७

तं उ चिरपाचिरपाहि दिवसश्रिया। अत्र तिग्मतेजसः ककुभां च यथा महच्छब्दविशेषणवशेन व्यक्तिविशेषपरिग्रहेण वाचनापकतया। नापि
कतया च व्यक्तिसत्यागनीमहिवसश्रियो पिप्रतिनापकत्वेन विष्यनीति किं। इषितये ति स्वशब्देयाहाने नश्लेषोपमाया रूक्ष विषयोप
त्रोपमानस्योपादाने मंतरेण साधारणोप्यपि विशेषणेन तथा प्रतीतिः। यथा स्वयं च पल्लवाताम्रभास्वत्करविराजिता। प्रभातसंध्ये
वास्वापफललुब्धेहितप्रदेति। अप्रस्तुतप्रशंसायामप्युपमेयमनयैव रीत्या प्रतीतं न पुनः स्वशब्देन विशिष्य सामान्यद्वारेणाभिव्यक्तौ
उपयुक्तमेव पुनः कथनम्॥ तदेते ऽलंकारदोषा यथा संभवं निर्दिष्टेष्वेवं जातीयकाः। एवोक्तपैवदोष जाया न्तर्भाविता न पृथक्प्रतिपा
दनमर्हन्तीति॥ ॥ काव्यप्रकाशे ऽर्यालंकारनिर्णयो नाम दशम उल्लासः॥ ॥ समाप्तं काव्यप्रकाशपुस्तकं॥ शुभमस्तु॥

का.मा.
८०

८०

११६०

सम.
८०